समयमयूखः

प७३१

4731

156

Complete

पंडतस्येदं



।। ।।श्रीगणेशायनमः।। ।।योलीलयासंतनुतेत्रिविधंततपालयत्यात्मनिविश्व
रूपे।।लयंनयत्याशु चपूर्णरूप शिवंतनोतासुरविमेमासो।।१।।श्रुतीःस्मृतीर्वीक्ष्यपु
राणजातंतत्तन्निबंधानपिसन्निबंधीन्।।श्रीशंकरस्यात्मजनीलकंठस्तिथ्यादिकंसंवि
करोतिसर्वं।।२।।प्रतारकैराहृतमत्रकिंचिन्नयातुनिर्मूलतयातदुक्तितं।कैनाक्ति
तातोनहितेनकाचित्तत्वबुभुत्सुहानापवितिर्नहीयते।।३।।संस्काराचारकालाः श्रीहेना
तिर्विवादतानेव।।अत्रोत्सर्गःप्रतिष्ठापायश्चित्तविशुद्धिशांताव।।४।।तिथिर्द्वेधा पू
र्णाखंडाच आद्यास्कांदे।।प्रतिपत्प्रभृतयःसर्वाउदयादोदयाद्रवेः संपूर्णाइतिविख्या
ताहरिवासरवर्जिताः हरिवासरएकादशी।। नत्रवधानारवग्रयते।। तद्भिन्नाखंडा।।त
स्याद्वैधमाहपैठीनसिः पक्षद्वयेपितिथयस्तिथिंपूर्वांतयांतरां। त्रिभिर्मुहूर्तैर्विध्यं

तिसामान्योयं विधिः स्मृत इति। अत्र पूर्वयातिथ्योरुदयोत्तरमुत्तरयावोदयात्पूर्वं त्रि
मुहूर्त्तयावेधो विधीयत इति केचित्। निर्बिहूर्णां तु सर्वेषां दिनमध्य एव पूर्वोत्तरतिथ्यो
र्द्विमुहूर्त्तयोः प्रवेशे वेधोभिमतः वक्ष्यमाणशिवरहस्य विष्णुधर्मोत्तरादिवाक्यात्॥
सर्वथाहोरात्रद्वयगामिनी तिथिः संदिग्धत्वान्निर्णेया॥ साच कर्मागतया विहितैव॥
न निषिद्धा। तथा वृद्धगार्ग्यः विधिः पूज्यतिथौ तत्र निषेधः कालमात्रक इति॥ यत्तु द
त्तः त्रिमुहूर्त्ता न कर्त्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगा
मिनीति॥ अत्रापि शब्दस्य पूर्वार्द्धेन्वयात्त्रिमुहूर्त्तत्यागे द्विमुहूर्त्तग्रहणे च तात्पर्यं॥ किं
तु द्विमुहूर्त्तस्याप्यनुकल्पता॥ अत एव शिवरहस्ये। यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात्त्रि
मुहूर्त्तगा॥ धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधा इति॥ तेन विष्णुधर्मोत्तरे उदिते दैव

संमा० तं मानौ पित्र्यंचास्तमिते रवौ ॥ द्विमुहूर्तं त्रिमुहूर्त्तं वा साति थिर्दर्शाख्ययोरिति द्विमुहूर्त्तं याद्य
२ तोक्तिरनुकल्प एव। उदिते भानौ द्विमुहूर्त्तं दैवतं। अस्तमिते अस्तंगते भास्करे इत्यर्थः त्रिमुहूर्त्तं
पित्र्यमित्यर्थः। अहः अपन्वयात् अस्तमित इति आदिकर्मणि क्तः। व्रतोपवासनियमे घटिकै
कापि या भवेत्॥ उदये सा तिथिस्तत्र विपरीता तु पैतृके इत्यादीनि पाद्मादिवचनानि तु वे
धानपेक्षाधिकरणन्यायेन त्रिमुहूर्त्तवेधमेव स्तुवंतीति माधवाद्यः एकादशीपरा एव तिद्धा
वैध्यानपेक्षाधिकरणाख्या युक्तेः चान्यपार विते न स्तुत्यर्थः। कासु चित्तिथिषु निषेधप्रयोज
कोवेधः स्कांदे॥ नागो द्वादशनाडीभिर्दिक्पंचदशभिस्तथा॥ भूतोष्टादशनाडीभिर्दूष रामं०
यत्युत्तरां तिथिमिति। नागः पंचमी। दिक् दशमी। भूतश्चतुर्दशी॥ इति वेधः तत्र वि २
हिता तिथिर्विभक्तविभागेन षोढा॥ एवं द्युरेव कर्मकालगा परेद्युरेवो भयोर्नोभयोरु

भयोरंशेनतत्रापिसाम्येनवैषम्येणवेति॥तत्रान्यतरदिनेकर्मकालगाचेत्सैवव्या
ह्या।योयस्यविहितःकालस्तत्कालव्यापिनीतिथिः तयाकर्माणिकुर्वीतह्रासवृद्धीनका
रणमितिगार्ग्योक्तेः। अतएवाहोरात्रसाध्यउपवासादेरहोरात्रगासैवव्याह्यानद
भावेऽन्यतरगा। दिवारात्रिव्रतंयद्वएकमेकतिथौगतं॥तस्योभयगयोगिमामावा
तेव्रतंव्रतीतिस्मृतेश्च॥ वैषम्येणकर्मकालस्पर्शोऽधिकायाह्या॥उभयोर्नोभयोः
साम्येनैकदेशभयोरितेतेषुपक्षेषुनिर्णयोनिगमे॥ युग्माग्नियुगभूतानांषण्मुन्यो
र्वसुरंध्रयोः रुद्रेणद्वादशीयुक्ताचतुर्दश्याचपूर्णिमा॥ प्रतिपद्यमावास्यातिथ्योर्यु
ग्मंमहाफलं। एतद्व्यस्तंमहादोषंहंतिपुण्यंपुराकृतमिति। युग्मंद्वितीया। अग्नि
स्तृतीयायुगंचतुर्थी। भूतंपंचमी। षट्षष्ठी।मुनिःसप्तमी। वसुरष्टमी। रंध्रंनवमी।

सं॰मा॰ ह्रं ३ एकादशी॥ तिथ्योर्युग्मं द्वितीयात्तृतीयायुतात्तृतीया चतुर्युतेति। एवं चतुर्थीपं
३ चम्यादीनां युग्मानि॥ यत्तु षष्ठ्यष्टम्यमावास्याशुक्लपक्षे चतुर्दशी॥ एताः परयुताः
पुण्यपराः एवैतास्संयुता इति युग्मवाक्यं तन्न्यथ तत्संवाधे। यत्तु प्रतिपत्सहिता यास्या
3 द्वितीया प्रतियद्युतेति॥ पञ्च चतुर्थीसंयुता पाचसात्तृतीया फलप्रदा॥ चतुर्थी च तृ
तीयायां महापुण्यफलप्रदेति तदेतद्विरुद्धं॥ अनयोश्च पक्षभेदेन व्यवस्थोक्ता वि
ष्णुधर्मोत्तरे॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः कृष्णपक्षे तिथिर्ग्राह्या
यस्यामस्तमितो रविरिति॥ कर्मकालव्याप्तौ तु उपक्रमगा॥ यो यस्य विहितः का राम॰
लः कर्मणस्तदुपक्रमे॥ विद्यमाना भवेद्ग्राह्या नोक्तितोपक्रमेण त्विति वचनात्। अयं ३
च युग्मवाक्यकृतो निर्णयो दैव एव कर्मणि॥ पित्र्ये तु पर्वोक्तपक्षेषु खर्वो दर्पस्तथा हिं

स्त्रिविधंतिथिलक्षणं।। खर्वदर्पौपरौ ज्ञेयौ हिंसास्यांतरवकालिकौ। इतिउशनोवचसानिर्ण
यः खर्वः साम्या दर्पो वृद्धिः हिंसाक्षयः एतेच खर्वादयः क्वचित्स्मर्यंति अपेक्षयाग्राह्यतिथे
रेव। क्वचित्ह्रासमये सोत्तरतिथेरित्तितत्रतत्रवक्ष्यामः तथाचनिगमे। द्वितीयायाद्यति
थिकयुग्मानांपूज्यतानियमादिषु।। एकोद्दिष्टेतुह्रासेवातुह्रासवृद्ध्यादिवोदनेति। अत्रा
घमादिपदं तिथ्यंतराणामुपादानार्थं। द्वितीयंसकलदैवकर्मणि।। तृतीयंपार्वण
श्रा। चतुर्थंवृद्धिराहोश्येषामितसंतरणासंविज्ञानबहुव्रीहिणासर्वदैवश्राद्धानां। मुख्यवृ
द्धिश्राद्धस्पतिथ्यप्रयुक्तखेनतन्निर्णयानुपयोगात।। ऐद्धिपूर्दिष्टनिमित्तकश्राद्धलक्ष
कं। पंचमंसाम्यस्य। ह्रासवृद्ध्यादिवोदनारखर्वदर्पादिवाक्यमित्यर्थः पत्रुदेवलः यांति
थिंसमनुप्राप्यउदयंयातिभास्करः सातिथिः सकलाज्ञेयास्नानदानजपादिषु इति।।

स॰मा॰ पञ्चस्कांदे। पांतिर्थिसमनुप्राप्य यात्यस्तं पद्मिनीपतिः॥ सा तिथिः सकला ज्ञेया स्नाना
४ ध्ययनकर्मसु॥ इति॥ तत्र एवौत्तरया घ्रातत्साधकानां युग्मखर्वस्तुत्क्रुसा/दिवचसां उपोद्बल
कं॥ एतदपवादः स्कांदे। मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः॥ व्यतीपाते वैधृतौ च
तत्कालव्यापिनी क्रिया॥ अभ्यंगे चोदधिस्नाने दंतधावन मैथुने॥ जाते च मरणे चैव
तत्कालव्यापिनी तिथिरिति। विरुद्धवचोव्यवस्था॥ अहः साम्नाम्नतो विभागमाह
व्यासः मुहूर्तैस्त्रिभिर्यः प्रातस्तावानेव तु संगवः मध्याह्नस्त्रिमुहूर्तैः स्यादपरा पि तादृशः
सायाह्नस्त्रिमुहूर्तैः स्यात्सर्वकर्मबहिष्कृत इति॥ एवं ह्यह्नः मध्याह्नापराह्न इति त्रेधा विभा राम॰
गस्पुक्तवित। एवं वाह्नपराह्न इति द्वेधा विभागस्पत्र पर्वनिर्णयादौ उपयोगो वक्ष्यते॥॥ ४
अथैकभक्तं॥ देवलः दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत्॥ एकभक्तमिति प्रो

तंनक्तंन्यासत्रयोगेतु॥ दिनार्धात्परंसामान्यतोयुक्तःकालोमध्याह्नांतावधिर्वा॥ मध्या
ह्नव्यापिनीग्राह्याएकभक्तव्रतेतिथिरितिबौधायनोक्तेः अत्रपूर्वोक्तषट्पक्षेषूत्तरदिन
एवकर्मकालव्याप्त्याभावविकस्पर्शेवोत्तराग्राह्याएवैवेतिमाधवाशयः॥ ॥अथनक्तं॥ ॥
व्यासः॥ त्रिमुहूर्तंप्रदोषःस्याद्भानावस्तंगतेसति॥ नक्तंदोक्तसंध्यायां॥ मार्कंडेयेनचत्वा
तत्रप्रकुर्वीतइतिशास्त्रस्यनिश्चयः यत्तुसायंव्याप्तित्रिघटिकाद्यस्तादुपरिभास्वतइतिस्कां
दोक्तसंध्यायां॥ मार्कंडेयेनचत्वारिमानिकर्माणिसंध्यायांपरिवर्जयेत्॥ आहारमै
थुनंनिद्रांस्वाध्यायंचचतुर्थकमितिभोजनंनिषिद्धंतत्रागप्रामंनवेधनक्तेभोजनंविधि
स्पृष्टेनिषेधानवकाशात्॥ एतेनपर्वादिरात्रिभोजननिषेधोप्यत्रपरास्तः॥ प्रदोषव्या
प्त्यभावेस्कांदे। प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते। आत्मनोद्विगुणाछाया

सं.मा.
५

5

मंदीभवति भास्करे ॥ तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनं ॥ एवं ज्ञात्वा ततो विद्वान्सायापा
के तु भुक्तिक्रियां ॥ कुर्याच्च नक्तव्रती नक्तं फलं भवति निश्चितमिति ॥ सौरनक्ते ॥ त्रिमुहूर्त्तस्प
र्गेवार्क निशि वै तावती तिथिः तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनं ॥ स्मृत्यंतरे विशेषः
यतिश्च विधवा चैव कुर्यान्नक्तं सदिवाकरं ॥ सदिवाकरं तु नक्तोक्तमंतिके घटिकाद्वयमिति
॥ ॥ इति नक्तनिर्णयः ॥ अथायाचितं ॥ तद्रूपायाचितभोजननिषेधरूपमयाचितं भो
ज्यमिति व्रतरूपं वा ॥ तस्य फलमुक्तं माधवीये स्मृत्यंतरे ॥ अयाचिताशी मितभुक्परां सि
द्धिमवाप्नुयादिति ॥ अत्र विशेषवचनाभावादुपवासवन्निर्णय इति केचित् ॥ तन्न ॥ एकभ
क्तायाचितयोर्विंशद्घटिकावधि ॥ सा तिथिः सर्वदा ज्ञेया नक्ते सापाह्नसंगतेति शार्ङ्गध
रीये नारदोक्तेः ॥ अथ प्रसंगाद्व्रतविषये किंचिदुच्यते ॥ सत्यव्रतः उदयस्था तिथिर्या हि न भ

रा.म.
५

वेद्दिनमथमाकुः॥ सारखंडानव्रतानांस्याद्दारंभस्य समापनमिति॥ ब्राह्मयामले॥ दिनभ
द्राप्रदा रात्रौ रात्रिभद्रा यदा दिवा॥ नतामता शुभकार्येषु प्राहुरेवं पुरातनाः॥ व्रतखंडे अग्निपु
राणे॥ व्रीहिर्षष्टिकमुद्गकलायाः सलिलपयः श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते
हिताः कूश्मांडालाबुवार्ताकपालक्यज्योत्स्निकास्त्यजेत्॥ चरुर्नैक्ष्यसक्तुकणाः शाकं द
धिघृतं मधु॥ श्यामाकाः शालिनीवारायावकं मूलतंडुलं। हविष्यव्रतनक्तादावग्निका
र्यादिके हितं॥ मधुमांसे विहायान्यद्व्रते वहितमीरितं ज्योत्स्निका कोशातकी॥ हितेविहितं
मधुमद्यं। छंदोगपरिशिष्टे कात्यायनः हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः मा
षकोद्रवगौरादीन्सर्वाभावेपि वर्ज्जयेत्॥ भविष्योत्तरे। हैमंतिकं सितास्विन्नं धान्यं मु
द्गा यवास्तिलाः कलायकंगुनीवारवास्तूकं हिलमोचिका॥ षष्टिकाः कालशाकं च मू

सं॰मा॰
६

त्वकंकेमुकेतरत्॥ कंदः सैंधवसामुद्रेलवणेमधुसर्पिषी। पयोनुद्धृतसारंच पनसाम्रह
रीतकी। पिप्पलीजीरकंचैवनागरंगाह्वतिंतिणी॥ कदलीलवली। धात्रीफलान्यगुडमैक्ष
वं। अतैलपक्वंमुनयोहविष्याणिप्रचक्षते॥ सर्पिः पयश्चात्रगव्यं। अतैलपक्वमित्येत
त्पक्वथितहविष्याणामेवविशेषणं। हारीतः पतितपाषंडिनास्तिकादिसंभाषणान्नृता
श्लीलादिकमुपवासादिषुवर्ज्जनीयमितिकौर्मे। बहिर्यांमांसपत्नान्स्पृतिंपतितंचरजस्व
6
ले॥ नस्पृशेन्नाभिभाषेतनेक्षेतव्रतवासरे॥ व्रताधिकारेसुमेतुः विहितस्यानुष्ठान
मिंद्रियाणामनिग्रहः निषिद्धसेवनंनित्यंवर्ज्जनीयंप्रयत्नतइति। विष्णुधर्मेषु। असकृ राम॰
ज्जलपानंचदिवास्वापंचमैथुनं॥ तांबूलचर्वणंमांसंवर्ज्जयेद्व्रतवासरइति॥ मांसनिषे ६
धः पारणांतेव्रतज्ञेपपितत्कैः नन्नुप्रधानदिने भावात्। वर्ज्जयेत्पारणेमांसंव्रता

हेय्योषधं सदैतन्मत्रो स्तु। औषधरूपमपि मांसं व्रताहे वर्जयेदित्यर्थः देवलः। असकृज्जल
पानाच्च सकृत्ताम्बूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ अशक्तौ तु स
एव॥ अतएवाम्बुपानेन नोपवासः प्रणश्यतीति॥ अत्ययेप्राणात्यये। वृद्धवसिष्ठः। उप
वासे तथा श्राद्धे न कुर्याद्दन्तधावनं॥ दन्तानां काष्ठसंयोगो हन्ति सप्तकुलानि वै॥ पैठी
नसिः। अलाभे वा निषेधे वा काष्ठानां दन्तधावने॥ पर्णादिना विशुद्धेत जिह्वोल्लेखः सदैव
च॥ व्यासः। अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ॥ अपां द्वादशगण्डूषैर्विदध्या
द्दन्तधावनं॥ विष्णुरहस्ये। स्मृत्यालोकनगंधादि स्वादनं परिकीर्तनं॥ अन्नस्य वर्जयेत्स
र्वं ग्रासानां चाभिकांक्षणं॥ गात्राभ्यंगं शिरोभ्यंगं ताम्बूलं चानुलेपनं॥ व्रतस्थो वर्जयेत्स
र्वं यच्चान्यद्बलरागकृत्॥ मैथुनं चाष्टधा तथा च स्मरणं॥ स्मरणं कीर्तनं केलिः प्रेक्षणं

सं॰मा॰ ७

गुह्यभाषणं॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥ एतन्मैथुनमष्टांगं प्रवदंति म-
नीषिणः॥ देवलः॥ स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि। निपद्यते ब्रह्मचर्यं
न दारेष्वृतुसंगमादिति॥ स्वदारेष्वृतुसंगमादित्यपि क्वचित्पाठः। विष्णुधर्मोत्तरे॥ तत्त्व
थजपनध्यानतत्कथाश्रवणादिकं॥ तद्दर्शनं च तन्नामकीर्त्तनश्रवणादयः उपवा
सकृतामेते गुणाः प्रोक्ता मनीषिभिः तद्बुद्ध्योपास्यदेवता व्रतदेवता वा॥ देवलः।
ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनं॥ व्रतेष्वेतानि चत्वारि कर्त्तव्यानाहसूरिभिः।
आमिषं मांसे। आमिषं हतिपानीयं गोवर्त्तं क्षीरमामिषं॥ मसूरमामिषं सस्ये फलेजं-
बीरमामिषं॥ आमिषं शुक्तिकाचूर्णं आरनालं तथामिषमिति स्मृत्यंतरोक्तं वा। पाद्मे
॥ अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः हविर्ब्राह्मणकाम्या च गुरोर्वचनमौ-

राम॰ ७

षष्ठं पयःपानाद्दिनामव्रतघ्नं स्त्रीबालाघात्यंतपीडितविषयं।सर्वभूतभयं चैवप
मात्तेगुरुशासने॥ अव्रतघ्नानियकर्यंतेसकृद्दत्तानिशाव्रतः सर्वभूतभयं सर्वेभ्योभू
तेभ्योभयं।हेमाद्रौमाद्रौपाद्ये॥ गर्भिणी सूतिकादिश्च कुमारी वाथ रोगिणी॥ यदाशुद्धातदा
ऽन्येनकारयेत्प्रयतास्वयमिति॥ मदनरत्ने छागलेयः पूर्वव्रतं गृहीत्वा योनाचरेत्काममोहि
तः जीवन्भवति चांडालो मृतः श्वाचाभिजायते॥ गरुडपुराणे॥ क्रोधात्प्रमादाल्लोभा
द्वाव्रतभंगोभवेद्यदि॥ दिनत्रयं न भुंजीत मुंडनं शिरसोथवेति॥ प्रायश्चित्तोत्तरमपि कांता
नुष्ठाने कार्यं प्रायश्चित्तमिदंकृत्वापुनरेवव्रती भवेदितिवायुपुराणोक्तः॥ ॥अथप्रति
पदमारभ्यक्रमेणसर्वतिथीनां निर्णयस्तत्कृतं चोच्यते॥ ॥तत्रादौप्रतिपन्निर्णीयते॥
तत्रप्रतिपदपराह्णव्यापिनीशुक्लपक्षे पूर्वायाह्या। प्रतिपदमावास्येतियुग्मवाक्यात्॥

समा॰ मदनरत्नेस्कंदपुराणेपि। प्रतिपत्संमुखीकार्यायाभवेदापराह्णिकीति॥ दीपिकापि॥
८ शुक्लास्यात्प्रतिपत्तिथिः प्रथमतश्चेत्सापराह्णेभवेदिति। तदभावेतूक्तंमाधवेन॥ तदभा
वेतुसायाह्नव्यापिनापरिगृह्यतइति॥ कृष्णपक्षेपराग्राह्या॥ तदुक्तंदीपिका ॥कृष्णात्तर
तोविलेति॥ ॥अथचैत्रकृ प्रतिपत्कृत्यंभविष्योत्तरे॥ चैत्रेमासिमहाबाहोपुण्याप्रतिप
दापरे। यातस्यांश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तम। नतस्यदुरितंकिंचिन्नाधयोव्याधयोन
प॥ तथा। कृत्वाचावश्यकार्याणिसंतर्प्यपितृदेवताः वंदयेद्धोलिकाभूतिंसर्वदुष्टोपशांत
ये॥ मंत्रः वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच। अतस्त्वंपाहिनोदेविभूतेभूतिप्रदाभवेति॥ राम॰
पुराणसमुच्चये॥ कृत्वेतुषारसमयेसितपंचदश्यांप्रातर्वसंतसमयेसमुपस्थितेच॥ सं ८
प्राश्यचूतकुसुमंसहचंदनेनसत्यंहिपार्थपुरुषोथसमासुखीस्यात्॥ पंचदश्यामतो

तायांप्रातरित्यर्थः येपिबंतिवसंताघेचूतपुष्पंसचंदनं॥ सत्यंहृत्स्थस्यकामस्यएजनंक्रि
यतेनरैरितिभविष्योत्तरात्॥ वसंताघेचैत्रप्रतिपदि॥ मंत्रः चूतमग्र्यंवसंतस्यमाकंदकुसुमंतव
।सचंदनंपिबाम्यघसर्वकामार्थसिद्धये॥ भविष्योत्तरे॥ ततः प्रातर्द्वितीयायांपुत्रमित्रादि
संयुतः नृपतिर्वितते देशेवितानवरशोभिते। उपविश्यासनेरम्येयोरज्ञानयदैःसह॥ सिंहर
कुंकुमसंदोहपद्मवासेसचंदनैः विकीर्यलोकांस्तांबूलैः संमान्यचपृथक्पृथक्॥ नृत्यगी
तविनोदैश्चकुर्यात्कामममहोत्सवं। एवंकुर्वंत्रवाप्रोतियावत्संवत्सरंसुखमिति। इदंपूर्ववि
द्धायामेव। वत्सरादौवसंतादौबलिराज्येतथैवच॥ पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरिति
पद्मवसिष्ठवाक्यात्। चैत्रशुक्लप्रतिपद्विवत्सरारंभेउदयव्यापिनीग्राह्या॥ तदुक्तंमाध
वीयेब्राह्मे॥ चैत्रेमासिजगद्ब्रह्मासमर्जप्रथमेहनि। शुक्लपक्षेसमग्रंतुतदासूर्योदयेसति

रमा॰ ८ तिा दिनद्वयेऽप्यव्याप्तावव्याप्तौ चापरैव ग्राह्या पूर्वोक्तवद्वसिष्ठवाक्यात्॥ तत्र तैलाभ्यंगो
कस्नेन वा। वत्सरादौ वसंतादौ बलिराज्ये तथैव च॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत
इति। अत्र शकादिश्रवणमुक्तं सोऽपि तिः शास्त्रे। शकवत्सरभूपमंत्रिरांगरसधान्येश्वरमेघप
तीनां॥ श्रवणात्पठनाच्चैव नृणां शुभमतो यातः शुभं समश्नु ति॥ चैत्रस्य मलमासत्वे तैला
भ्यंगशकश्रवणादि शुद्ध एव कार्यं। यद्यपि वत्सरवसंतयोः प्रवृत्तिर्ज्ञाता॥ तथापि षस्त्य
र्द्धिसैर्मासः कथितो बादरायणैः एवं मद्दे परिताज्यकर्त्तव्यावोत्तरे क्रियेति वचनेन पूर्व
मासस्य कृत्यस्यान्तरमासे कर्त्तव्यताभिधानात्॥ नवरात्रे रामनवम्यादिवत्॥ तथात्र वि राम॰
शेषो भविष्ये॥ अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे। पुण्येऽह्नि विप्रकथिते प्रपादानं समा ८
रभेत्। ततस्तोयस्य ज्ञाने विद्वान्मंत्रेणानेन मानवः। प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता।

।यस्याः प्रदानात्पितरस्तृप्यंतु हि पितामहाः । अनिवार्यं ततो देयं जलं मासचतुष्टयं ।। प्रयां
द्यतमशक्तेन विशेषाद्धर्ममाप्सुना ।। एतद्ध घर्मघटश्चारुवस्त्रसंवेष्टिताननः स्रगास्रगं हेदपः
शीतामलजलः शुचिः । मंत्रः एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः । अस्य प्रदानात्स
कला मम संतु मनोरथाः अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति ।। प्रयाति दानफलं सोपि
प्राप्नोतीह न संशय इति । मेषशुक्लप्रतिपदि दृश्याहरारंभः । काशीखंडे । मेषमासि सिते
पक्षे प्राप्य प्रतिपदं तिथिं ।। दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः एवं सर्वासु तिथि
षु क्रमस्नापी नरोत्तमः आशुक्लपक्षदशमी प्रतिजन्माघमुत्सृजेदिति ।। आश्विनशुक्ल
प्रतिपदि नवरात्रारंभः तदुक्तं हेमाद्रौ धौम्येन ।। आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं
।। प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ।। अत्र पूर्वाह्णव्यापिनी ग्राह्या । आश्विनस्य

स॰मा॰ १०

10

सितेपक्षेनवरात्रमुपोषितः सुस्नातस्तिलतैलेन पूर्वाह्लेन पूर्वाह्णे पूजयेच्छिवामिति
देवीपुराणेतस्यकर्मकालतोक्तेः कर्मणोयस्ययः कालस्तत्कालव्यापिनीतिथिरिति
नेनकर्मकालव्यापिन्यामेवकर्तव्यत्वोक्तेः नवरात्रोपवासानुरोधेननिर्णयः तस्यनव
रात्रमुपोषितः पूजयेदित्यादिदेवीपुह्णव्यापित्वेनैवनिर्णयः पूजायास्तुप्राधान्यंफ
लसंबंराराध्येनखानिनिकृंतति स्नातीत्यादिवत्फलिसंस्कारत्वेनपूजांगत्वावगमात्।
अतः प्रधानभूतपूजाकालपूर्वाह्णव्यापित्वेनैवनिर्णयः पूजायास्तुप्राधान्यंफल
संबंधात्॥ मत्सकारे। आश्विनेमासिमेघांतेमहिषासुरमर्दिनी। देवीसंपूजिताये रा॰म॰ १०
अष्टरात्रेष्टमीषुचा। क्रीडंतिविविधैर्भोगैर्देवलोकेसुडुलंभे॥ नापयोव्याधयस्तेषांनच
शत्रुभयंभवेदितियत्तुगौतिरार्गावदेवीपुराणे। शरत्कालेमहापूजाक्रियतेयाचवार्षि

की॥ सा कार्योदयगामिनी न तिथेस्तत्र युग्मतेति॥ तत्रोदयगामित्वमपि प्रायः पूर्वाह्न
व्यापित्व एव भवतीति। न तु युग्मताद्युग्मवाक्यानुरोधेन निर्णयः इत्यर्थः वार्षिकीत्यनेन संव
त्सरस्याहो चैत्रशुक्लप्रतिपद्युपक्रम्य नवम्यंता एता अभिधीयन्ते॥ तत्र शुक्लशरद्वसंतयोस्तु
ल्य एव दुर्गोत्सवः कार्यः यानितु। यो मां पूजयते नित्यं द्वितीयादिगुणान्विता॥ प्रतिपद्धा
रदे ज्ञात्वा सोश्नुते सुखमव्ययं। पत्रिकुर्पाद्मायुक्ता प्रतिपच्छापनेमम। तस्पशापाद्
तेद्त्वाभस्म शेषं करोम्यहं॥ आयाह्णालु रुतेपस्तु कलशस्थापनं मम। तस्य संपद्विना
शः स्याज्जेषः पुत्रो विनश्यति॥ तथा। न दर्शकलया युक्ता प्रतिपच्चंडिकार्चने। उदये द्वि
मुहूर्तापि याह्यासोदयगामिनीति। पाचाश्वयुजि मासे तु प्रतिपद्ध्रइयान्विता॥ शुद्धमेमार्व

स्मा० नंतस्यांशतयज्ञफलप्रदमित्यमायोगनिषेधकानि।यानितु। द्वितीयाशेषसंपूर्णाप्र
२२ तिपद्वंडिकार्चने॥ मोहादस्योपदेशाद्वाकृतंपुत्रविनाशकं॥ आरंभेनवरात्रस्यद्वितीया
त्रुटिसंयुता॥ नकेवलंतिथिंहंतिवेधात्सापुत्रसंपदमिमानिद्वितीयायोगनिषे
धकानितानुभयविधान्यपिसर्वाणिनिर्मूलानि।समूलत्वेपिपरस्परसत्प्रतिपक्षत्वा
दनिर्णायकानि॥ चंद्रप्रकाशे॥ प्रातरावाहयेद्देवीप्रातरेवप्रवेशयेत्॥ प्रातःप्रातश्च
संपूज्यप्रातरेवविसर्जयेदित्युक्तं॥ सतिसंभवेप्रतिपदि आद्यंनाडीषोडशकंसंत्यज्य राम०
कलशंस्थापयेत्। आद्याःषोडशनाड्यस्तु कल पः कुरुतेनरःकलशस्थापनंतत्र २२
ह्यरिष्टंजायतेध्रुवमितिदेवीपुराणवचनात्। कलशस्थापनेवैधृतिचित्रादियोगानि

षेधकानिवचनानिनिर्मूलानि॥ यामलापुताचेत्प्रतिपन्नुलभ्यते विरुद्धयोर्गौरपि संगता
मता। सैवापराह्णे विबुधैर्विधेया स्त्रीपुत्रराज्यार्थिविवृद्धिहेतुरिति तिथिहासस्तकर्त्रेब्बो देवी
सेपूजने व्रताते नमंनिहिता देवी हासोयेनरुतः प्रभो॥ रुद्रयामले। कलशस्थापने तु
दिवैव कार्यं न रात्रौ॥ तदुक्तं मात्स्ये। न रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनमिति॥ अत्र त्रि
रात्रमप्युक्तं हेमाद्रौ धौम्येन। त्रिरात्रं वापि कर्त्तव्यं सम्पादियथाक्रममिति॥ देवीपुराणे
। कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां। अयाचीत्व थ वैकाशी नक्ताशी वाथ वाप्य
रः प्रातःस्नायी जितद्वंद्वस्त्रिकालं शिवपूजकः। जपहोमसमायुक्तः कन्यकां भोजयेन्मुदा
॥ शिवंसुशिवांगशिवौतयोः पूजकः। नंदा च प्रतिपद्देवी प्रथमोपस्थितत्वात्॥ तत्र प्रतिप
त्पूर्वाह्णे तिलतैलेन स्नातो यजमानो गणपतिं संपूज्य देशकालौ निर्दिश्य पनवमीयर

र्यतंउपवासाद्यन्मतमनिषमोपेतोदुर्गापूजनममुकफलकामःकरिष्यइतिसंकल्पये
तात्ततःकदलीस्तंभवस्त्राद्भिर्मंडितेगृहेचतुरस्त्रंचतुर्हस्तंवेदिकोपुरिसर्वतोभद्रादिमंडलंवि
धायतत्रमहीद्यौरित्यादिवरुणाएजातंकलशंसंस्थापयेत्॥ सौवर्णादिप्रतिमापूजार्थं
॥पूजामंडलनुंभस्ठेतिदेवीपुराणात्॥ मन्मथ्यादिकांतुकलशस्यपश्चादासनेस्था
प्या॥ वेदिकोणेष्वपिचत्वारःकलशाःस्थाप्याः॥ चतुरःकलशामस्तुदद्याद्देवगृहे
नरःचतुःसमुद्रवलयांसतुभुक्तेवसुंधरामितिविष्णुधर्मोत्तरात्॥ प्रतिमाचहेमादिम
यी॥ देवीपुराणे॥ हेमरजतमृच्छाद्युशैलचित्रार्पितापिवा॥ खड्गेशूलेर्चितादेवीसर्व
कामफलप्रदा॥ मन्मथीप्रतिमांकृत्वाविल्वेवायस्तुपूजयेत्॥ आत्मवित्तानुसारेण
सलभेन्मौलिकेफलमिति॥ प्रतिमालक्षणंमत्स्यपुराणे॥ जटाजूटसमायुक्तामर्द्धेंदु

कृतलक्षणां॥ लोचनत्रयसंयुक्तांपूर्णेंदुसदृशाननां। अतसीपुष्पवर्णाभांसुप्रतिष्ठां
सुलोचनां॥ नवयौवनसंपन्नांसर्वाभरणभूषितां। सुचारुवदनांतद्वत्पीनोन्नतपयोधरां॥ त्रिभं
गस्थानसंस्थानांमहिषासुरमर्दिनी॥ त्रिशूलंदक्षिणेध्यायेत्खड्गंचक्रंक्रमादधः तीक्ष्णबाणं
तथाशक्तिंवामतोऽपिनिबोधत॥ खेटकंपूर्णचापंचपाशमंकुशमूर्ध्वगं॥ घंटांवापरशुंवापि
वामतः संनिवेशयेत्॥ अधस्तान्महिषंतद्वद्विशिरस्कंप्रदर्शयेत्। शिरश्छेदोद्भवंतद्वद्दा
नवंखड्गपाणिनं॥ हृदिशूलेननिर्भिन्नंनिर्यदंत्रविभूषितं। रक्तरक्तीकृतांगंचरक्तविस्फा
रितेक्षणं। वेष्टितंनागपाशेनभ्रुकुटीभीषणाननंसपाशवामहस्तेनधृतकेशंचदुर्गया॥ व
मद्रुधिरवक्त्रंचदेव्याः सिंहंप्रदर्शयेत्॥ देव्यास्तुदक्षिणंपादंसमंसिंहोपरिस्थितं। किंचिदूर्ध्वं
तथावाममंगुष्ठंमहिषोपरि। स्तूयमानंचतद्रूपममरैः संनिवेशयेदिति॥ ध्यानमथैवं

स॰मा
१३
13

॥ एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ॥ आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥ अस्यां म
त्तौ समागच्छ स्थितिं मत्कृपया कुरु ॥ रक्षां कुरु सदा भद्रे विघ्नेश्वरि नमोस्तु ते इति आवाहनं । भग
वति दुर्गे इहागच्छ इह तिष्ठ इह संनिधेहि स्थिरा भव सुप्रसन्ना भव इत्यपि पठंति । एवमादिमंत्रपंचकु
र्याद्याद्यमंत्रैर्गीतमभिधायान्नयंत । मंगला काली भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धा
त्री स्वाहा स्वधा नमोस्तु ते ॥ अनेनैव तु मंत्रेण राजपद्धोमादि कारयेत् इति देवीपुराणोक्तेः तान्द्ध
गैः पूजयेन्मंत्रैः सर्वदेवान्समाहितः इत्यग्निपुराणादेः देविक आगमिको वा ॥ नेमग्रासर्वसमाप
दिति साधारणवाक्यात्प्रणवादि चतुर्थ्यंतं नमोंतं नाममंत्रो वा ॥ स्कांदे तु । दुर्गे मेऽस्तु रेका
पै भवदुःखविनाशिनि । पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीं ॥ अनेनैव तु मंत्रेण राज
पद्धोमादि कारयेदित्युक्तं ॥ छत्रचामरादिभी राजोपचारैः पूजा । तदंते प्रणामं देवीं प्रार्थयेद

राम॰
१३

नेनमंत्रेण॥ महिषघ्निमहामायेचामुंडेमुंडमालिनि॥ द्रव्यमारोग्यविजयंदेहिदेविनमः
सदा॥ भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहेश्वरि॥ देवेभ्योमानुषेभ्यश्चभयेभ्योरक्षमांसदा॥
सर्वमंगलमंगल्येशिवेसर्वार्थसाधके॥ शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते॥ रूपंदे
हियशोदेहिभगंभगवतिदेहिमे॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे॥ इति॥ ततोदुर्गा
मंत्रंवैदिकमागमिकंवाजपेत्॥ दुर्गायत्वाजपेन्मंत्रमेकचित्तः समाहित इति॥ देवीपुराणो
क्तं॥ पद्ममाहात्म्यंभगवत्यास्तुपुराणादिषुकीर्त्तितं॥ पठेद्वाशृणुयाद्वापिसर्वकामसमृद्धये
॥ तथा॥ एकोत्तरादिवृद्ध्यातुनवमींयावदेवहि॥ चंडीपाठंजपेद्वेवज्ञापयेद्वाविधानतः॥ वा
राहीतंत्रे॥ संकल्पितस्तोत्रपाठेसंख्यांकृत्वापठेत्सुधीः तत्रैव॥ चंडीपाठफलंदेविशृणु
ष्वाद्रतोमम॥ एकावृत्त्यादिपाठानांयथावत्कथयामिते॥ संकल्पपूर्वंसपूर्णमस्यांगोषु

स॰मा॰ मन्त्रसंकृत॥ पाठाद्धलिप्रदानाच्च सिद्धिमाप्नोतिमानवः उपसर्गोपशांत्यर्थं त्रिरावर्त्तं
२४ पठेन्नरः ग्रहोपशांतौकर्त्तव्यं पंचावर्त्तं वरानने॥ महाभयेसमुत्पन्नेसमावृत्तंसमुच्चयेत्॥
नवावृत्त्याद्भवेच्छांतिर्वाजपेयफलंलभेत्॥ राजवश्यायभक्त्यैवरुद्रावृत्तंमुदीरयेत्॥ अर्को
14 वृत्तेकाम्यसिद्धिर्वैरहानिस्तुजायते॥ मन्वावृत्त्यादिपुर्वश्यस्तथास्त्रीवश्यतामियात्॥ सौ
ख्यंपंचदशावृत्त्याच्छ्रियमाप्नोतिमानवः कलावृत्त्यापुत्रपौत्रधनधान्यागमंविदुः राज्ञो
भीतिविमोक्षायवैरस्योच्चाटनायच॥ कुर्यात्सप्तदशावृत्तंतथाष्टादशकंप्रिये॥ महारण्य
प२ विमोक्षार्थंविंशावृत्तंपठेत्सुधीः पंचविंशावर्त्तनाद्भवेद्बंधविमोक्षणं॥ संकटेसमनुप्रा राम॰
प्तेदुश्चिकित्स्यामयेतथा॥ जातिध्वंसेकुलोच्छेदेआयुषोनाशआगते॥ वैरिवृद्धौव्या २४
धिवृद्धौधननाशेतथात्तये॥ तथैवत्रिविधोत्पातेतथैवातिपातिके॥ कुर्याद्यत्नाच्छ

तावन्नैनततः संपद्यतेध्रुवं ॥ श्रेयोवृद्धिः शताहस्राङ्डाजस्तृद्धिस्तथापरा ॥ मनसाचिं
तितं देवि सिद्ध्येरक्षोत्तराच्छृतात ॥ शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ॥ सहस्राव
र्तेनाश्वस्मीराहस्रोतिस्तत्रपैस्थिरा ॥ भुक्तामनोरथाकाम्मान्नरोधोत्तमवाप्नुयात ॥ यथा
श्वमेधः क्रतूनां देवानांचयथाहरिः स्तवानामपिसर्वेषांतथासप्तशती स्तवः ॥ अथ
वा बहुनोक्तेन किमेतेन वरानने ॥ वंघ्याः शताहानिपाठात्सर्वाः सिद्धीति सिद्धपद्धति ॥
पाठश्चनारायणादीन्नमस्कृत्यकार्यः नारायणीनमस्कृत्यनरंचैवनरोत्तमं ॥ देवींसर
स्वतींव्यासंततोजयमुदीरयेत इतिवचनात ॥ जयशब्दार्थश्चभविष्यपुराणे ॥ अष्टादश
पुराणानिरामस्यचरितंतथा ॥ विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत ॥ कार्ष्णंचपंच
मोवेदोयन्महाभारतंस्मृतं ॥ शैवाश्चधर्माः राजेन्द्रमानवोक्तामहीपते ॥ जयेतिनामए

तेषांप्रवदंतिमनीषिणइति॥पाठप्रकारस्तुमात्स्ये॥प्रणवंवारितोजस्वास्तोत्रंवासंहितां
जपेत्॥अंतेचप्रणवेद्घारस्तथाविफलंभवेत्॥शुद्धेनोनमविच्छिन्नेनपठितव्यंप्रयत्नतः॥न
कार्यासक्तमनसाकार्यंस्तोत्रस्यवाचनं॥आधारेस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः॥हस्त
संस्थापनादेवयस्मात्तस्यफलंभवेत्॥स्वयंचलिखितंयच्चकृतिनालिखितंचयत्॥अ
ब्राह्मणेनलिखितंतच्चापिविफलंभवेत्॥कुशीलेलखकःनडुपजीवीतर्थः।कृषिछेदादि
केन्सस्यपठेत्स्तोत्रंविचक्षणः॥संकल्पितेस्तोत्रपाठेसंख्यांकृत्वापठेत्सुधीः॥अध्यायेप्रा
प्यविरमेन्नतुमध्येकदाचन॥कृतेविरामेमध्येतुअध्यायादिंपठेत्पुनरिति॥श्रवणंचब्रा
ह्मणादेवकार्यं॥ब्राह्मणंवाचकंविद्यान्नान्यवर्णजमादरात्॥श्रुत्वान्यवर्णजाद्वाज
न्यवाचकान्नरकंव्रजेत्इतिमविष्यपुराणात्॥पद्मापिदेवीपुराणे॥जपपूजादिकहोमो

पिष्टमहमुक्तस्तथाप्यष्टम्यां नवम्यां वा कार्यः ब्राह्मपुराणे ॥ तत्राष्टम्यां भद्रकाली
ऌपक्रम्य होमैर्ब्राह्मणान्तर्पयेत्तोरितिष्टमी कृत्वा मध्यपाठात् ॥ नवम्यां बलिदानं च कर्त्त
व्यं वै यथाविधि ॥ जपं होमं च विधिवत्कुर्यात्तत्र विभूतये इति कालिकापुराणे ॥ शिष्टा
चाराच्च ॥ बलिदानमथाष्टमी नवम्योरेव । पुनः पूजां तथाष्टम्यां विशेषेण समाचरे
त्जागरं च स्वयं कुर्याद्बलिदानं महानिशि । प्रभूतबलिदानं च नवम्यां विधिवच्चरेदिति
कालिकापुराणात् अत्र यद्यपि शिष्टपरिग्रहीत कालिकापुराणादिषु महिषस्वगात्र
रुधिरपूरस्सु घातादिकमुक्तं तथापि ब्राह्मणस्य न भवति ॥ मद्यं दत्वा ब्राह्मणस्तु ब्रा
ह्मण्यादेव हीयते ॥ स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयादिति कालिकापुराणे एवं नि
षिद्धत्वात् ॥ सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैरित्येतत्प्रकारक सात्त्विकपू

स॰मा॰
१६

16

ज्ञायांभगवतीतापादिषु १३। ब्राह्मणाधिकारिकतापाएवंतज्ञेः पशुबलिदानस्यतु
विजयार्थंनृपोत्तमइतिराजपुरस्कारेणैवविहितत्वाच्च। अतोमाषभक्तादिनातेनब
लिदानंकार्यंमाषकुल्माषमांसाद्यैर्योदिस्तुबलिर्निशि। कूष्माण्डमिक्षुदंडंचमद्यमास
वएवच॥ एतेबलिसमाज्ञेयातृप्तौछागसमामताइतिकालिकापुराणात्॥ ॥अथ
कुमारीपूजादेवीपुराणेब्रह्मोवाच॥ ॥नतथातुष्यतेशक्रहोमदानजपादिना॥ कु
मारीपूजनेनात्रयथादेवीप्रसीदति॥ अत्रनवरात्रे। शुक्लाष्टमीचतुर्दश्योर्नवम्यांचविशे
षतइतिच। प्रसंगादस्यापिविधानं। कुमारीपूजनेविशेषोमदनरत्नेस्कांदे॥ एकैकांपूज राम॰
येत्कन्यामेकवृद्ध्यातथैवच। द्विगुणांत्रिगुणांवापिप्रत्येकंनवकंतुवा॥ एकवर्षातुया १६
कन्यापूजार्थंतांविवर्जयेत्॥ गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते॥ द्विवर्षकन्या

मारभ्यदशवर्षावधिक्रमात् ॥ यथोक्तफलमेतद्देवीपुराणे विवाहानंतरं कन्यां कन्या
त्वमुपजायते ॥ तावत्संपूज्यते कन्या यावत्पुष्पं न दृश्यते इति ॥ एतन्मंत्रस्तु स्कांदे । मंत्राक्षरम
यीं लक्ष्मीं मातृणां रूपधारिणीं । नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं । जगत्पूज्ये
जगद्वंद्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥ एवमभ्यर्च्य
कुर्यात्कुमारीणां प्रयत्नतः कंचुकैः शुभवस्त्रैश्च गंधपुष्पाक्षतादिभिः नानाविधैर्भक्ष्यभो
ज्यैर्भोजयेत्पायसादिभिः । अत्राप्येकस्य कन्यास्वरूपमुक्तं तत्रैव । हीनाधिकांगीं कुष्ठां च विनाशि
कुलसंभवां ॥ ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां ॥ जात्यंधां केकरां काणां कुरूपां
तनुरोमशां ॥ संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवामिति । विनाशिसंततिस्पष्टं । ग्रंथय
ः कूर्परजान्वाद्याः तनुश्चासौ रोमशेति कर्मधारयः देवीगृहे दीपश्चाहोरात्रं ज्वालनीयः

सा०मा० ःमत्स्यपुराणे॥ गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत्। घंटा भवेदशक्तस्य सर्ववाद्यमयी
१७ यत इति। पूजा च प्रत्यहं त्रिकालं कार्या। त्रिकालं शिवपूजक इति पूर्वोक्तदेवीपुराणात्। ज्योतिः
शास्त्रे सप्तम्यां बिल्वशाखापूजोक्ता। आश्विनस्य सिते पक्षे तु मुहूर्ते न सप्तमी। तस्यां च प
त्रिकापूजा कर्तव्या नवनायकैः। प्रशस्तां सफलां बिल्वशाखां मातृस्य पूजयेदिति॥ अथ
बोधनप्रकारः। तत्काला लिंगपुराणे कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा। नवम्यां बोध
येद्देवीं महाविभवविस्तरैः। भविष्ये। षष्ठ्यां बिल्वतरौ बोधं सायं संध्यासु कारयेत्। देवीपुराणे
। ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं। बिल्वस्थापनमद्य इति बिल्वतरुं संपूज्य बिल्ववृ राम०
क्षे जयंती। सा दिङ्गे इहागच्छ सा दिनाच दुर्गामावाह्य पूजयित्वा। गीतवाद्यघोषपुरःसरं देवीं ९
विबोधयेत्। मंत्रस्तु। रावणस्य वधार्थाय रामस्यानुग्रहाय च॥ अकाले ब्रह्मणा बोधो देव्या

आसपिकृतः पुरा इषे मासि सिते पक्षे नवम्यां मार्गयोगतः श्रीवृक्षे बोधयामि त्वां यावत्पूजां करो
म्यहं। इति। ततो बिल्वतरोरामंत्रणं। मंत्रस्तु। मेरुमंदारकैलासहिमवच्छिखरे गिरौ। जातः श्री
फलवृक्षत्वमंबिकायाः सदाप्रियः। श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः। नेतव्योसि म
या वृक्ष पूज्यो दुर्गास्वरूपत इति। अपरेद्युः पुनरपि संपूज्याकृतांजलिः प्रसारयेत्। बिल्ववृक्ष
महाभाग सर्वदा शंकरप्रिय। गृहीमातव शाखां तु दुर्गापूजां करोम्यहं। शाखाच्छेदोद्भवं दुः
खं न च कार्यं त्वया प्रभो। इति। ततः फलयुतामपराजितां दिग्गतामेकां शाखां छेदयेद्दानेन
संमेन मंत्रेण। ओं छिंधि छिंधि फट् हुं हुं फट् स्वाहेति मंत्रः। ततः शाखामग्रे आनीय बिल्वशा
खापैनम इति पूजयित्वा बिल्वशाखां पोमन्मयप्रति मायां च देवीमावाहनपुरःसरं पूजयि
त्वा माषभक्तादिबलिं च दत्त्वा ढोलादिना शाश्वं प्रतिमां च पूजागृहद्वारदेशे स्थापयित्वा

स॰मा॰ १८ 18 माषभक्तादिबलिं च हृत्वा पूजागृहस्थानि भूतानि भूतेभ्योनमइतिगंधादिभिः संपूज्य भू
ताः प्रेताः पिशाचश्च ये पवसंत्यत्र भूतलोगृहे तु ते मया दत्तो बलिरेष प्रसाधितः पूजिता गंधपु
ष्पाद्यैर्बलिभिस्तर्पितास्तथा। देशादस्माद्विनिः सृत्य पूजा पश्यंतु मत्कृतां। भूतेभ्य एष भ
क्ते बलिर्नमइति बलिं दत्वा अथ सर्वेभ्यो भूतेभ्यो भूताभूमिपालकाः भूतानामविरोधेन
पूजा कर्म करोम्यहं फडिति तामयसारपेता। स्थितेषु तत्र नैवेद्यं मण्डलं तथा। किंतु पंतिम
हालुब्धानचगृहेतिदेवताः तस्माद्यत्नेन कर्तव्यं भूतानामपसारणमिति कालिकापुरारा
ता सर्षपादीश्च विकिरेत्। ततः पुनः शाखायां प्रतिमायां च देवीं संपूज्य गीतवाद्यादिपुरः। राम॰
सरं पूजागृहे प्रवेशयः आरोपिता सिद्धे गौर्विभ्रम्य पेक्षा फलेपि चास्थितरानितां तं भूता मे १८
गृहे त्वं कामदा भवेति पूजागृहस्थापयेत्। ततः प्राणप्रतिष्ठां कृत्वा। आवाहयाम्यहं देवी

मन्नमपेश्रीफलेनतथा।कैलासशिखराद्देविविंध्याद्देर्हिमपर्वतात॥ आगत्यबिल्वशाखां
पांचंडिकेकुरुसंनिधिं।भगवतिडुर्गेइहागच्छेत्फभयोरावाघ्या॥ स्थापितासिमयादेविश्रीफ
लेमन्नमपेपिच॥ आपुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते॥ भगवतिडुर्गेइहतिष्ठतिष्ठाप
पितांडुर्गेडुर्गस्वरूपासिसुरतेजोमहाबले॥ सदानंदकरेदेविप्रसीदममसिद्धये॥ एह्येहि
भगवत्संवध्यात्रुत्तवत्नयप्रदे॥ भक्तितःपूजयामितांडुर्गेदेविसुरार्चिते॥ प वैश्वफलोप
तैःपुष्पैस्सुसुमनोहरैः॥ पल्लवैसंस्थितेदेविपूजयेत्वांप्रसीदमे॥ डुर्गेदेविइहागच्छसांनि
ध्यमिहकल्पय॥ यज्ञभागान्गृहाणत्वंयोगिनीकोटिभिःसहेतिकृतांजलिःपठेत्॥ त
तोजपेत्।मादिदुर्गायैनमः इदंपाद्यंपुष्पगंधाक्षतकुंकुमरक्षिदूर्वांकुशतिलबिल्वपत्र
सहितजलेनार्घ्यमाचमनीयपंचामृतस्नानीयपुनराचमनीयवस्त्रपुनराचमनीयपातुले

स॰मा॰ १९ पनानि दत्वा ॐ दुर्गायै नम इति पुष्पांजलित्रयं दद्यात् ॥ ततश्च मन्त्रोऽद्भवं श्रीवृक्षो ह्रीं शंकर
स्य सदाप्रियं ॥ बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि इति बिल्वपत्रं ॥ ब्रह्मविष्णुशिवादी
नां देवानां पुष्पं सदाप्रियं । तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति देवानां पुष्पैर्वा नि
वेद्य जयन्तीमादिना पुष्पधूपदीपनैवेद्य पुनरामन्त्र्य ततो बलिं निदत्वा पूजां सानुगणार्थं दे
वितरां दत्वा स्तुतिभिः स्तुत्वा प्रणम्य बद्धांजलिः प्रार्थयेत् ॥ महिषघ्नि महामाये चामु
ण्डे मुण्डमालिनि द्रव्यमारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते । कुंकुमेन समालब्धे चंदनेन विलेपिते
बिल्वपत्रकृतापीडे दुर्गे हं शरणागतः सर्वमंगलेति । रूपं देहीति च श्लोकं पठेत् ॥ बलिं च द रा॰म॰
द्यात् ॥ एवमेव महाष्टम्यामपि देवीपूजनं विशेषतस्तद्दिने रात्रौ जागरणं वा राजा तु विजयकामो १९
ऽष्टम्यां रात्रौ विशेषपूजां सर्वकं बलिं दद्यात् ॥ तदर्द्धयामिनीशेषे विजयार्थं नृपो नमः पंचाब्द

19

त्तरोगोपेतं गं यक्षपस्त्र गर्वितं ॥ विश्विवत्कालिकालीति जखार खड्गेन घातयेदिति देवी पुराणा
त ॥ पंचाब्दं महिषमज्ञं वात त्रैव शस्त्रादि एजनं च नुपांत ॥ महानवम्यामेव मेव एजा बलिदानं
मश्व होममंत्रश्च जपेत् । त्यादि: अनेनैवतु मंत्रेण राज्ञ पट्टो मादिकार यते इति देवी पुराणात । प्र
थवंत त्रैवोक्तं ॥ एतयेत्तिलहोमे स्वदविक्षीर घृतादिभिरिति । केचित्तु प्रतिश्लोकं च जुहुयात्ताय
मंतिलसर्षिवेतिरहस्यं यथवचनात्सम शतौ सत्वेन प्रतिश्लोकं तिलसर्पिर्मिश्रपायसेन हो
मं कुर्वंति ॥ राज्ञा तत्र चर्या प्रशांतयेब्रह्मपुराणो कारैवंतएजापिकार्या ॥ सच्चवउ बारूपाणां
मुखापांसु पीडस्त्रोवाजिगणाधिपः एतामंत्रः शालिहोत्रे ॥ नमो देवाधिपं उत्तसत्तर्णां वां
बजामहे ॥ मंत्रेणानेन रेवंतं पाद्यार्घ्येरर्चयेत्सुधीः ॥४ देवापतुरंगबलचारिणे ॥ सूर्यपु
त्रापदेवापतुरंगमहितास्व चा । तुरंगपरिषघमस्त्राजो परिधावति ॥ साप्तमस्याधि४ दश

स्यायातः रक्षां विधायावि सर्जयेत् ॥ संप्रेषणं प्रेषणां कुर्यादीशान्यां शाबरोत्सवैरिति भा पुरा
णात् ॥ ततः संप्रेषिता देवी ईशान्यां शबरोत्सवैरिति कालिकापुराणाच्च ॥ एवं रक्षां विधाय
प्रणमेद् दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः प्रियां ॥ सर्वलोकप्रणेत्रीं च प्रणमामि
सदा शिवां ॥ मंगलां शोभनां शुद्धां निष्कलां परमां कलां ॥ विश्वेश्वरीं विश्वमातां चंडिकां
प्रणमाम्यहं ॥ सर्वदेवमयीं देवीं सर्वरोगभयापहां ॥ ब्रह्मेशविष्णुनमितां प्रणमामि
सदा उमां ॥ विंध्यस्थां विंध्यनिलयां विंध्यस्थाननिवासिनीं ॥ योगिनीं योगमातां च चंडिकां
प्रणमाम्यहं ॥ ईशानमातरं देवीं ईश्वरीं ईश्वरप्रियां ॥ प्रणतोस्मि सदा दुर्गां संसारार्णव
तारिणीं ॥ य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः ॥ समुक्तः सर्वपापेभ्यो दुर्गया सह मोद
तइत्यादिभिः स्तोत्रैः स्तौ सादान्महेश्वरीति प्रसाद्य नमस्वेतत्स्कार एकं पुष्पं ॐ दुर्गायै नम

20

इत्येशाम्भंस्त्वाबद्धांजलिर्महिषघ्नीं माहिस्तोकचतुष्टयेन प्रार्थ्य विधिहीनं क्रियाहीनं भक्ति
हीनं परिवितं। एवं भवतु तत्सर्वं त्वत्प्रसादात्पवित्रं सजा। उत्तिष्ठ देवि चंडे शिशुमां पूजां प्रगृह्य च।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥ गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके॥ व्र
जस्व। तोजलेह्यैति ष्वगेहे च भूतये॥ इत्यच्छोप्यगा तवाघ ब्रह्मघोषपुरःसरं स्रोतोज
लसमीपं गता॥ ॐ गौरि देवि जगन्मातः स्वस्थानं गच्छ पूजिते॥ संवत्सरे व्यतीते तु पुनरागम
नाय वै॥ इमां पूजां मया देवि यथाशक्त्या निवेदितां॥ रक्षणार्थं समादाय व्रज स्वस्थानमु
त्तममिति प्रवाहयेत्॥ ततो देवीपूजास्थाने शांतकलशोदकेन ब्राह्मणैरभिषिक्तो भोदक्षि
णां दत्वा ब्राह्मणान्भोजयित्वा बंधुभिः सार्द्धं भुंजीत॥ ॥ अथ लोहाभिसारिकं कर्म भ
विष्योत्तरे॥ जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात्॥ लोहाभिसारिकं कर्म का

मा॰ रयेद्यावदष्टमी ॥ पाण्डुके च वराहे देशे पताकाभिरलङ्कृतं । मंडपं कारयेद्दिव्यं नवं नवसमक्र
२२ रं वरं ॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं ॥ मेखलात्रयसंयुक्तं पोन्मुच्चलदलाभया ॥
राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ॥ आनीय मंडपे तानि सर्वाण्येवाधिवासये
त ॥ ततस्तु ब्राह्मणाः स्नाताः शुक्लाम्बरधराः शुचिः । ॐकारपूर्वकैर्मन्त्रैस्त्रिलिङ्गैर्जुहुयाद्व
ह्नौ ॥ शस्त्रास्त्रमेवैत्रैर्हीतं पापसंघतसंयुतं ॥ हुतशेषं तुरंगाणां गजानामुपहारयेत् ॥ ब
द्धयतिस्तराम्भव गजाश्वाश्समलंकृतान् ॥ आमयेन्नगरे निसीने दिघोषपुरःसरान् ॥ प्रसहं
नृपतिः स्नात्वा संपूज्य पितृदेवताः । पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ॥ हुतशेषं प्र राम॰
दातव्यं आपनापनिकेजने ॥ लोहनामाभयत्पूर्वं असुरः सुमहाबलः सदैवैः समरे क्रुद्धैर्व २२
हुधा शकलीकृतः तदङ्गसंभवं सर्वं लोहं यद्दृश्यते क्षितौ ॥ तस्याभिहरणाज्जातो विजयः स

मुदाहृतइति॥ एतान्मंत्रान्स्तुतस्तैः॥ पथ्यांबुदस्थादपाति शिवायेमांवसुंधरां॥ तथा
छत्रस्य राजानं विनयारोग्यसिद्धये॥ छत्रस्य॥ शशांककरसंकाशहारडिंडीरपांडुरं॥
प्रोत्सारयाशुदुरितं चामरामरभूषण॥ चामरस्य॥ शक्रकेतो महावीर्य सुपर्णास्त्वमुपा
श्रितः यतस्त्रिराडेनतेयस्तथा नारायणध्वजः काश्यपेयोमृताहर्त्ता नागारिबलवाह
नः अप्रमेयो दुराधर्षो रणेदेवारिसूदनः गरुत्मान्मारुतगतिस्त्वयि संन्निहितः स्थितः
शस्त्रवर्मायुधामोधान्त्ररत्नत्वं चरिपून्दह॥ ध्वजस्य॥ उतमुग्वसर्वोरुडावायुः सोमो महर्ष
यः नागकिंनरगंधर्वा यक्षभूतगणास्तथा यमथाश्वसहादित्यैर्भूतेशो मातृभिः सह॥ श
क्रः सेनापतिः स्कंदोवरुणश्चाश्रितस्त्वयि॥ प्रदहंतु रिपून्सर्वान्राजा विजयमृच्छतु॥ या
नि प्रयुक्तान्यरिभिर्भूषणानि समंततः एतानि सर्वे शत्रूणां हतानि तव तेजसा॥ कालने

भिवधेयद्वघद्वाज्ञिपुरघातनो।हिरण्यकशिपोर्युद्धेयुद्धेदैवासुरेतथा॥ शोभितासि
तथैवाघशोभस्वसमयेस्मर॥ नीलांबराभिमांरक्षानश्यत्वाशुममारयः इतिपता
काया॥ डंडुभेत्वंसपत्नानांघोषाद्धृदयकंपन॥ भवस्मभिपसेमानांतथात्वंजयवर्द्ध
नायथाजीमूतघोषेणहृष्यंतेवरवारणाः तथास्मत्कृतेवशब्देनहर्षोस्माकंजयावहः॥ डं
डुभेः पुण्यस्त्विशंखपुण्य।नामंगलानांचमंगले॥ विष्णुनात्वंधृतोनित्यमतः शांतिं
प्रयच्छमे॥ शंखस्य।महेंद्रनिर्मितेदिव्येदेवराजादिसेविते॥ शिबिकेपाहिमांनित्यं
सदात्वंसंनिधौभव॥ शिबिकोदोलिकयोः विजयोजयदोजेतारिपुघातीशुभंकरः डं
खदाधर्मदः शांतः सर्वारिष्टविनाशनः एतेवैसंनिधौयस्मात्त्वसिंहाबलाः तेनसिंह
सनेतित्वंदेवैर्मंत्रेश्चगीयसे॥ त्वयिस्थितः शिवः साक्षात्त्वयिशक्रः सुरेश्वरः त्वयि

22

स्थितो हरिर्दैवस्त्वद्रथं तथा तेन तव: नमस्ते सर्वतोभद्र भद्रो भव मम पते: त्रैलोक्यं जय सर्वत्र सिं
हासन नमोस्तु ते ॥ सिंहासनस्य ॥ गंधर्वकुलजातस्त्वं माभूया: कुलदूषक: ब्रह्मण: सत्यवाक्येन सो
वरुणस्य च ॥ मस्य तेजसा चैव सूर्यस्य मुनीनां तपसा सदा ॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥ प्रभावाद्बहुता
शस्य वर्द्धस्व तुरंगम ॥ स्मर त्वं राजपुत्रोसि कौस्तुभं च मणिं स्मर: सुरासुरैर्मथ्यमानात् क्षीरोदा
मृतादिभि: जात उच्चै:श्रवा: पूर्वं तेन त्वं जातोसि तत् स्मर ॥ यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथ
या ॥ भूम्यर्थे नृतवादी च हतश्रियश्च पराङ्मुख: सूर्याचंद्रमसौ वायुर्यावत्पश्यंति दुष्कृतं ॥ व्रजा
यतां गतिं त्वं प्रेतस्य या प्रभवेन्न वा विहतिं परिगच्छेथा युद्धाध्वनि तुरंगम ॥ रिपून्विजित्य समरे
सह भर्त्रा सुखी भव ॥ अश्वस्य ॥ कुमुदैरावण: पद्म: पुष्पदंतोथ वामन: सुप्रतीकोंजनो नीलस्य
तेष्टौ देवयोनय: तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिता: मंद्रो भद्रो गजश्चैव राजसंकीर्णा

पु॰मा॰ एवचु॥ वनेवनेप्रसूतास्तेपुष्पाणिसुमहांतिच॥ यांत्वांवसवोरुद्रा आदित्याः समरुद्गणाः।
२३ मंत्रैरर्चंतनागेंद्रस्वाभीवप्रतिपालयंतां॥ ध्रुवामुहिजयंपुष्टेगमनेस्वस्तिनोव्रज॥ गजस्य॥ प्रो
त्सारणायदुष्टानांसाधुसंग्रहणायच। ब्रह्मणानिर्मितश्चासिव्यवहारस्यसिद्धये॥ यशोदेहि
23 सुखंदेहिजयदोभवभूपतेः ताडयस्वरिपून्सर्वान्हेमदंडनमोस्तुते॥ कनकदंडस्य॥ सर्वायुधा
नांप्रथमंनिर्मितासिपिनाकिना। शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहंशुभं॥ चंडिकायैप्रदत्ता
सिसर्वदुष्टनिवर्हिणी। तयाविस्तारिताचासिदेवानांप्रतिपादिता॥ सर्वसत्वांगभूतासिसर्व
दुष्टनिवर्हिणी॥ छुरिकेरक्षमांनित्यंशांतिंयछनमोस्तुते॥ छुरिकायाः॥ रक्षांगानिगजा राम॰
न्रक्षरक्षवाजिधनानिच॥ ममदेहंसदारक्षकट्टारकनमोस्तुते॥ कट्टारकस्य॥ सर्वायुधमहा २३
मात्रसर्वदेवारिसूदन॥ चापमांसमरेरक्षसाकंसायकसत्तमैः धनंकृष्णेनरक्षार्थंसंहारार्थंह

रेणाच ॥ त्रयीमन्त्रिगतं देव धनुरस्त्रेन माम्पहं ॥ धनुषः ॥ शर्मप्रदस्त्वं समरे चर्म सैन्ये यशो घमे
।रक्ष मां रक्षणीयो हं तापनेयनमोस्तु ते ॥ चर्मणः ॥ प्रासताप यशत्रूंस्त्व मनयालोकमायपा
।ग्रहाण जीवितं तेषां मम सैन्यं च रक्षय ॥ कुन्तस्य ॥ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरास
दः श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च ॥ इत्यष्टौ तव नामानि पूर्वमुक्तानि वेधसा । नक्षत्रं
कृत्तिका तस्मै गुरुर्देवो महेश्वरः हिरण्यं च शरीरं ते धाता देवो जनार्दनः पिता पितामहो देव
स्त्वं मां पालय सर्वदा ॥ इति पेन थतोत्तारणी हत शुम्भमहिषासुरः तीक्ष्णधाराय शुद्धाय तस्मै ख
ड्गाय ते नमः ॥ खड्गस्य ॥ लोहाभिसारिकं कर्म कृत्वैवं मन्त्रपूर्वकं ॥ जयं प्राप्नोति नृपतिः सर्वा
न्कामान्समश्नुते ॥ इति लोहाभिसारिकं ॥ ॥ अत्र सप्तके विशेषो विश्वरूपनिबन्धो । आ
श्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ॥ शावाशोवे समुत्पन्ने क्रियाकार्यं कथितं बुधैः देवीपूजा

पु॰ मा॰
२४

24

कृ
वकर्त्तव्यौ पशुपूजाविधानतः सूतके पूजनं प्रोक्तं दानं चैव विशेषतः देवीमुद्दिश्य कर्त्तव्यंत
त्र दोषो न विद्यत इति ॥ सूतके पारणं कुर्यात्त्ववमर्पि होमपूर्वकं ॥ तदंते भोजयेद्विप्रान् दा
नैर्द्यात्सुशक्तितः तदंते सूतकांत इत्यर्थः तथा मलमासे न कर्त्तव्यं नवदुर्गोत्सवव्रतं ॥
अस्तंगते गुरौ शुक्रे सिंहस्थे विबुधाधिपे ॥ देवपूजनमुद्दिष्टं स्थिरे बालके तथा ॥ आ
धारंभे विरामः स्यादिति पादोनवित्तं ये दिति । तथा स्त्रीणां विशेष उक्तो गारुडपुराणे ॥
गंधालंकारतांबूलपुष्पमालानुलेपनं ॥ उपवासे वर्ज्येति दिनधावनमंजनमिति
दिकं ॥ ॥ इति नवरात्रकृत्यं ॥ ॥ कार्त्तिकशुक्लप्रतिपत् पूर्वविद्धा ग्राह्या । पूर्वविद्धाप्र
कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति बृहद्यमोक्तेः माधवोपि । वस्तुतस्त्वेवंचपर्वैर्युरुपवास
वदाचरेदिति । पूर्वविद्धायामित्यर्थः इह तैलाभ्यंगश्चावश्यकः । तथा च वृद्धवसिष्ठः ॥ वत्स

राम॰
२४

रात्रैवसंतापैर्बलिराज्ञेतथैवच॥ नैलाभ्यंगंमनुर्वाणो निरयंप्रविपद्यतइति॥ अत्रवि
शेषोहेमाद्रौस्कांदे॥ प्रातर्गोवर्द्धनः पूज्योद्यूतंचापिसमाचरेत्॥ पूजनीयास्तथागावस्ता
मेवाहनदोहने॥ मंत्रः गोवर्द्धनधराधारगोकुलत्राणकारक॥ बहुबाहुकृतच्छायगवांको
टिप्रदोभव॥ गोपूजामंत्रः यालक्ष्मीर्लोकपालानांधेनुरूपेणसंस्थिता॥ घृतंवहतियज्ञा
र्थेममपापंव्यपोहतु॥ अग्रतः संतुमेगावोगावोमेसंतुपृष्ठतः गावोमेसंतुहृदयेगवांम
ध्येवसाम्यहमिति॥ ततोपराह्णसमयेपूर्वस्यांदिशिभारत॥ मंत्रः मार्गपालिनमस्तेस्तुस
र्वलोकसुखप्रदे॥ विधेयैः पुत्रदाराद्यैः पुनरेहिव्रतस्यमे॥ मार्गपालीतलेनेत्थंयांति
गावोगजावृषाः राजानोराजपुत्राश्चब्राह्मणाः शूद्रजातयः मार्गपालींसमुल्लंघ्यनी
रुजः स्युः सुखान्विताइति॥ भविष्ये॥ कृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः॥ पूजांकुर्या

मा० त्वपःसात्ताङ्मौमंडलकेशुभे॥ वलिमालिख्यदैत्येंद्रंवर्णार्णकैःपंचरंगकैः॥ गृहस्य
२५ मध्यशालायांविशालायांततोर्चयेत॥ लोकश्चापिगृहस्यांतःशय्यायांशुक्लतंडुलैः
संस्थाप्यवलिराजानंफलैःपुष्पैश्चपूजयेत॥ मंत्रस्तु॥ वलिराजनमस्तुभ्यंदे
वदानववंदित। इन्द्रशत्रोमहाशत्रोविष्णुसान्निध्यदोभवेति॥ भालेतस्माद्घृतंप्रकर्त्त
व्यंप्रभातेतत्रमानवैः तस्मिन्घृतेजपोयस्यतस्यसंवत्सरंजयः परोजयोविरुद्धस्थला
भेनाशकरोभवेत॥ रचिताभिस्त्रसहितैर्नैर्यासाचभवेन्निशेति॥ ॥इतिप्रतिपन्निर्ण
यः अथद्वितीयाः॥ ॥सातुपरैव॥ युग्माग्नीतिवचनात॥ एकादश्यष्टमीषष्ठी राम० २५
द्वितीयाचचतुर्दशी॥ त्रयोदशीअमावास्यातूपोष्याः स्युपरान्विताइतिविष्णुधर्म
मोत्तरात॥ अत्रविशेषःस्कांदे॥ आषाढस्यसितेयक्षोद्वितीयापुष्यसंयुता॥ तस्यांरथे

समारोप्य रामं वै भद्रया सह॥ यात्रोत्सवं प्रवर्त्याथ भीरापेत द्विजान्बहून्॥ भद्रा सुभद्रा
॥श्रावणाक्रस्य द्विती याव्रहन्तयो च्यते॥ सा एवं विद्या ख्याता॥ तस्यां हसं वर्त्तैः कृसा षष्मी ह
हन्नेपासा वित्रीव रपेत्रका॥ कामत्रयोदशी रंभा उपोष्याः एवं संपुता इति। उपोष्याः स
वनीया इति। कार्त्तिकं शुक्ल द्विती यायमद्वितीयोच्यते॥ सापराह्णव्यापिनी ग्राह्या कर्म
कालव्याप्तात॥ तदुक्तं स्कांदे। ऊर्ज्जे शुक्ल द्विती यायामपराह्णेर्चयेद्यमं॥ स्नानं कृत्वा
भानुजमां यमलोकं न पश्यति॥ ऊर्ज्जे शुक्ल द्विती यायां पूजितस्तर्पितो यमः वेष्टितः
किं नरैर्हंत्यैस्तस्मै यच्छति वांछितं॥ भविष्ये पि॥ कार्त्तिके शुक्लपक्षस्य द्विती यायां
युधिष्ठिर। यमो यमुनया पूर्वं भोजितः स्वगृहे र्चितः अतो यमद्वितीयेयं त्रिषु लोके
षु विश्रुता॥ अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टि

ध०मा० २६ वर्द्धनं॥ शानानि च प्रदेयानि भगिनीभ्यो विशेषतः स्वर्णालंकारवस्त्रान्नपूजासंस्कारभो
जनैः सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः अभावे भगिनीनां प्रतिपन्नकास्तत्स्था
नीयाः ब्रह्मांडेय॥ यानुभोजयते नारी भ्रातरं युग्मके तिथौ॥ अर्चयेद्वापि तांबूलै
र्न सा वैधव्यमाप्नुयात्। भ्रातुरायुः क्षयो राजन्नूनं भवेन्न कर्हिचिदिति॥ ॥इति द्विती
यानिर्णयः॥ ॥अथ तृतीया॥ सा तु परैव॥ तदुक्तं विष्णुधर्मोत्तरे॥ एकादश्य
26
ष्टमीषष्ठीपौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विताः चैत्र
शुक्लतृतीयायां दोलोत्सवो रामार्चनं वेदिकायां गारुडे। मधौ शुक्लतृतीयायां जानक राम० २६
कीरमणं प्रभुं॥ राज्ञोपचारैः संपूज्य मासमान्दोलयेत्कलौ। दक्षिणाभिमुखं देवं दो
लमानं सुरेश्वरं॥ सुदृष्ट्वा सकृद्ध्वा सर्वपापैः प्रमुच्यते॥ चैत्रमासि सिते पक्षे तृती

यायां रमापतिं ॥ दोलारूढं समभ्यर्च्य मासमां दोलयेत्कलौ ॥ दोलारूढं प्रपश्यंति ये कृष्णं
मधुमाधवे ॥ अपराधसहस्रैस्तु मुक्तास्ते नात्र संशयः दोलारूढस्य देवस्य प्रेक्षं कुर्वंति जागरं
॥ सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत् ॥ इयमेव गौरीतृतीया ॥ तत्र मुहूर्त्तमात्रापि
परयुता ग्राह्या ॥ वचनं तत्रैव स्मृते ॥ मदनरत्ने स्कांदे विशेषः तृतीयायां यजेद्देवीं शंकरेण सम
न्विता ॥ कुंकुमागरुकर्पूरमणिवस्त्रैः सुगंधकैः स्रग्गंधधूपदीपैश्च [illegible] दमनेन विशेषतः ॥
आंदोलयेत्ततो वत्स शिवोमातुष्टये सदेति ॥ वैशाखशुक्लतृतीयायां त्रिलोचनयात्रोक्ता
काशीखंडे ॥ राधशुक्लतृतीयायां स्नात्वा पैलिप्पिले ह्रदे ॥ संतर्प्य पितृन्देवान् त्रिलोच
न मथार्चयेदिति ॥ इयमेवाक्षयतृतीयेत्युच्यते ॥ तदुक्तं भविष्ये ॥ या तैषा कुरुशार्दूल वै
शाखे तु महातिथिः तृतीया साक्षया लोके गीर्वाणैरभिवंदिता ॥ यस्मिन्विहूयते दानं

× द्युक्तं सान्नं कुंभं सदक्षिणं । पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठत्विति ॥ एतदसंभवे तिल ६

सं॰मा॰ २७ खल्पं वा यदि वा बहु ॥ तत्सर्वमक्षयं यस्माद्नेनेयमन्त्रयास्मनेति ॥ इयमेव युगादिः ।
सा पूर्वाह्णव्यापिनी ग्राह्या ॥ तदुक्तं नारदीये । देवकृत्ये तथा कृष्णे युगादौ कव्यपोविडः शुक्ले
पौर्वाह्णिके ग्राह्या कृष्णे चैवापराह्णिके इति ॥ अत्र विशेषो गोविंदार्णवे देवीपुराणे ॥ तत्तोयं
तु वैशाखे रोहिण्यर्क्षे च प्रसन्न ॥ उदकुंभप्रदानेन शिवलोके महीयते ॥ कलशदानमंत्र
स्तु ॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः । अस्य प्रदानात्तृप्यन्तु पितरोपि पितामहा
ः गंधोदकतिलैर्मिश्रं पानकाय मिश्रकं ॥ तत्रैव विष्णुपुराणे ॥ पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात्पितृभ्यः प्रयतो मनुष्यः श्राद्धं कृतं तेन समा ॥ सहस्रं रहस्यमेतत्पितरो वदंति ॥ राम॰ २७
॥ तथात्र मलमासे सति विशेषश्चंडिकायां ॥ यौगादिकं मासिकं च श्राद्धं चापरपक्षिकं ॥
मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि च ॥ अपरपक्षो नाम कृष्णपक्षोत्र गृह्यते ॥ मलमा

27

सेमहालयस्य निषेधात्॥ ज्येष्ठशुक्लतृतीयारंभात्तृतीयारंभात्तृतीयोच्यते॥ सा पूर्वा ग्राह्या॥
तदुक्तं माधवीये स्कांदे॥ एहन्नपात तथा रंभा सावित्री वटपैतृका॥ कृष्णाष्टमी च भूता च कर्त्त
व्यां संमुखी तिथिरितिः संमुखी नाम सा याह्नव्यापिनी समर्थः ब्रह्मवैवर्त्तेपि रंभाख्यां वर्ज
यित्वैकात्तृतीयां द्विजसत्तम॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यत इति। गणाश्च तथा।
भाद्रशुक्लतृतीयायां विशालाक्षी यात्रोक्ता काशीखंडे॥ भाद्रशुक्लतृतीयायामुपवास
परैर्नृभिः॥ कृत्वा जागरणं शच्यौ विशालाक्षी समाप्यत इति॥ अत्र रात्रिव्यापिनी ग्राह्या
॥ रात्रौ जागरणविधानात्॥ भाद्रशुक्लतृतीया रितालिकोच्यते॥ सा मुहूर्त्तमात्रापि
परयुता ग्राह्या॥ तदाह माधवे॥ मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकाया
मप्येवं गणयोगप्रशंसनादिति॥ चतुर्थीयुक्तापातु फलाधिक्यमाह माधवीये॥ आप

सुमा० १८ स्नावः ॥ चतुर्थीसहितायातुसातृतीयाफलप्रदा॥ अवैधव्यकरीस्त्रीणांपुत्रपौत्रप्रवर्द्धिनी॥
द्वितीयायोगेपतंवापमध्याह्नसएव॥ द्वितीयाशेषसंयुक्तांयाकरोतिविमोहिता॥ सावैधव्य
मवाप्नोतिप्रवदंतिमनीषिणइति॥ आश्विनकृष्ण३तृतीयायांललितारव्यायात्रोक्ताः काश्मी
खंडे॥ इषकृष्णतृतीयायांललितांप्रतिपूज्यवै॥ नारीवापुरुषोवापि तेवांछितंफलामि
ति॥ ॥इतितृतीयानिर्णयः अथचतुर्थी॥ ॥सापरायाह्या॥ युगम्भूतानामितियुग्म
वाक्यात्॥ माधवीयेबृहद्वसिष्ठोपि॥ राकादशीतथाषष्ठीअमावास्याचतुर्थिका॥ उपोष्या
ः परसंयुक्ताः पराः पूर्वेणसंयुताइति॥ सर्वासुचतुर्थीषुदुंढिपात्रोक्ताकाशीखंडे॥ कुर्या रामः
यतिचतुर्थीह्यायात्रांविघ्नेशितुःसदा॥ ब्राह्मणोभ्यस्तडुंढेशादेयावैमोदकाशीखंडेमुदेति १८
॥ नैगो॥ अंगारकचतुर्थ्यांयेस्नात्वोत्तर्भमासेमासेहोलयत्कलौ॥ दोलारूढंप्रपश्यंतियेक्न

28

रवहीभसि॥ अम्बर्षेगानरकेशानंनमस्यंतिनरोत्तमाः नतेषांयद्दपीडावकदाचित्कापिनापत
इति॥ नागचतुर्थीतुमध्यान्हव्यापिनीपरविद्धा ग्राह्या॥ तदाहहेमाद्रौगार्ग्येदेवलः॥ पुगंमध्यंदिने
यत्रतत्रोपपोष्याणीश्वरान्॥ क्षीरेणाप्याय्यपंचम्यांपूजयेत्प्रयतोनरइति॥ पुगंचतुर्थी॥ विनायकचतु
र्थ्यांतृतीयायुतैवानडुक्तेतत्रैव॥ चतुर्थीतुतृतीयायांमहापुण्यफलप्रदा॥ कर्त्तव्याव्रतिभिर्वत्सगण
नाथसुतोषिणीति॥ श्रावणकृष्णचतुर्थीसंकष्टचतुर्थीत्युच्यते॥ साचंद्रोदयव्यापिनीग्राह्या॥
तदुक्तंस्कांदे॥ श्रावणेबहुलेपक्षेचतुर्थ्यांचविधूदये॥ तस्मिन्दिनेव्रतंकार्यंसंकष्टाख्यंसुरेश्वरी॥
१२ ति॥ दिनद्वयेचंद्रोदयसत्वेऽसत्वेवापूर्वैवमातृविद्धागणेशेइतिवचनात्॥ भाद्रकृष्णचतुर्थ्यां
बहुलाव्रतं तच्चपूर्वमेवतदुक्तंगोविंदार्णवेपुराणसमुच्चये॥ गौर्यावहुतथावत्से नुपूजना
दुर्गार्चनंडमरहोलिकेच॥ वत्सस्यपूजाशिवराविरेताः पराचितास्थितिनृपंसराष्ट्रम्

॰मा॰ २९ तिभाद्रशुक्लचतुर्थी वरदचतुर्थीत्युच्यते। सा मध्याह्नव्यापिनी पूर्वविद्धा ग्राह्या॥ पूर्वदिने म
ध्याह्नव्याप्त्यभावे परैव॥ तदुक्तं माधवीये बृहस्पतिना॥ चतुर्थी गणनाथस्य मातृविद्धा प्रश
स्यते। मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति॥ स्मृत्यन्तरेऽपि॥ मातृविद्धा प्रशस्ता स्या
च्चतुर्थी गणनायके। मध्याह्नात्परतश्चेत्स्यात् नागविद्धा प्रशस्यत इति। सिद्धिविनायक
व्रतेऽपि सा मध्याह्नव्यापिनी ग्राह्या। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप इति पू
जायास्तत्कालत्वात्। उभयदिने मध्याह्नव्याप्त्यव्याप्त्योर्वा पूर्वैव। मातृविद्धा प्र
शस्यत इति वाक्यात्॥ इयं चेद्रविभौमाभ्यां युता महतीत्युच्यते॥ तदुक्तं वराहपुराणे॥ राम॰
भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता॥ महती सात्र विघ्नेशमर्चयेष्टं लभेन्नर २९
इति। अस्यां चेंदुं न पश्येत्॥ तदाह मार्कंडेयः॥ भाद्रे मासि सिते पक्षे चतुर्थी स्वातियो॰

29

गिनी॥ मिथ्याभिशापं कुरुते दृष्ट्वैवं ज्ञानसंशयः पराशरोपि कमादित्ये चतुर्थ्यां शुक्ले च
न्द्रस्य दर्शने॥ मिथ्याभिदूषणं कुर्याद्रात्रौ पश्येन्न तत्सदा॥ अत्र रात्रिग्रहणाद्दिवादर्शने न
दोष इति। रात्रावेव चंद्र आभाति॥ तद्दोषशान्त्यर्थं पुराणांतरे॥ ततश्चतुर्थ्यां रात्रौ यः प्रमा
दाद्वीक्षमाणश्चः पठेन्मंत्रं॥ किं वा कंधाञ्जुखो वा उदङ्मुखः॥ सिंहः प्रसेनमवधीत्सिंहो जां
बवता हतः सुकुमारक मा रोदीस्तव ह्येष स्यमंतक इति॥ वरदचतुर्थी तत्वावस्था विहितं तत्रै
व॥ सुरासुराणामुवती गणेशं भक्तिपूर्वकं॥ तस्मात्प्राह्रादहरे तस्मात्पसमा दरचतुर्थिकेति॥ मा
घशुक्लचतुर्थीति लचतुर्थी॥ तदुक्तं काशीखंडे॥ माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः॥
येत्वां ढुंढे चयिष्यंतिते वर्ज्याः सुरासुरैरहो॥ विनायकवार्षिकोयात्रा चतुर्थी सा प्रतापसी॥ शु
क्लां तत्तिलाननगुडैर्वध्यापाश्रीयान्तुकाद्वती॥ तापसी माघी॥ अत्र नक्तग्रहणान्न दोषव्याप्ति

नीयाद्येतिरिक्ता॥ ॥इति चतुर्थीनिर्णयः॥ ॥अथ पंचमी सा चतुर्थीयुतैव ग्राह्या॥ युग
भूतानामिति युग्मवचनात्॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नवमी चैव कर्त्तव्या
संमुखी तिथिरिति पैठीनसिवचनाच्च॥ संमुखी सायाह्नव्यापिनी॥ ब्रह्मवैवर्त्तेऽपि॥ प्रतिपत्सं
मी भूतसावित्री वटपूर्णिमा॥ नवमी दशमी चैव नोपोष्याः परसंयुता इति॥ माधवीये स्कांदे
ऽपि॥ पंचमी च तथा कार्या चतुर्थीसंयुता विभो इति॥ मत्स्यपुराणे॥ ब्रह्मणो यो दिनस्यादि
ः कल्पादिः स प्रकीर्तितः वैशाखस्य तृतीयायां कृष्णा फाल्गुनस्य च॥ पंचमी चैत्रमासस्य तस्यै
वोन्त्या तथापरा॥ शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैता
ः संस्मराम्यहं॥ कल्पानामाद्ययो ह्येता दत्तस्याक्षयकारकाः॥ अत्रैव कृष्णा आपराह्णिका इति यु
गादिवच्च स्पष्टा। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः कृष्णपक्षे तिथिर्ग्राह्या यस्या

मस्तंगतो रविरिति वाक्यात्। अत्र पक्षविशेषानुपादानेपि शुक्लो ज्ञेयः श्रावणशुक्लपंचमी स्मृ
ते॥ सा परविद्धा ग्राह्या। तदुक्तं चमत्कारचिंतामणौ॥ पंचमी नागपूजायां कार्या षष्ठी समन्वि
ता। तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति॥ एतापमार्त्तंडेऽसमतंतरेति। श्रावणे पंचमी शु
क्ला संप्रोक्ता नागपंचमी॥ तां परित्यज्य पंचम्यश्चतुर्थी सहिता हिता तिथिः॥ ॥ अत्र कर्त्त
व्यमुक्तं काशीखंडे। यः स्नातो नागपंचम्यां॥ तां परित्यज्य पंचम्यश्चतुर्थी सहिता हिता(ति) स्ना
कुंडे वासुकिसंज्ञके। न तस्य विषसंसर्गो भवेत्सर्पसमुद्भवः कर्त्तव्या नागपंचम्यां यात्रा वर्षा
सु तत्र वै। नागाः प्रसन्ना जायंते कुले तस्यापि सर्वदेति॥ गोविंदार्णवे भविष्येपि। श्रावणे मा
सि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः। पूजयेद्विधिवद्वी
र दधिदूर्वांकुरैः कुशैः गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ये तस्यां पूजयंतीह नागा

...मा० नभक्तिपरस्मराः नतेषांसर्पतोवीरभयंभवतिकुत्रचिदिति॥ माद्रशुक्लपंचमीऋषिपंचमात्म
३१ चते॥ नउक्तंब्राह्मे। नभस्येशुक्लपक्षेतुयदाभवतिपंचमी॥ नृधारिकेतथास्नात्वाकृत्वानियममेवच॥ ब्रा
ह्मणीक्षत्रियावैश्याशूद्रावापिवरानने। कृत्वानैमित्तिकंकर्मगत्वानिजगृहंपुनः वेदिंसम्य
कप्रकुर्वीतगोमयेनोपलिप्यतां॥ रंगवल्लीसमायुक्तांनानापुष्पोपशोभितां॥ तत्रसप्तऋषीन्
दिव्यान्भक्तियुक्ताप्रपूजयेदिति। तत्रपंचमीपूर्वयुतायाह्येतिमदनरत्नेयुग्मवाक्यात॥ माध
वीयेप्येवं। आश्विनशुक्लपंचम्यांउपांगललिताव्रतं॥ घपिमहानिबंधेषूनुक्तंतथाप्यतिप्रचा षई
रान्निर्णीयते॥ तत्रपंचमीमध्याह्नव्यापिनीग्राह्यातत्रैवपूजाविधानात॥ माधवीयेस्मृत्यंतरे राम०
पि॥ पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरिति॥ मार्गशीर्षपंचम्यापिनागपंचमी॥ सुक्षेमा ३२
गशिरेशुक्लपक्षावैरोयाचपंचमी॥ स्नानदानेबहुफलानागलोकप्रदायिनीतिस्कांदेहेमाद्रौ

31

॥ इयमपि षष्ठीयुतैव ग्राह्या॥ पंचमी नागपञ्चम्यां कार्या षष्ठीसमन्वितेति पूर्वोक्तवचनात्॥
॥ इति पंचमीनिर्णयः॥ ॥ अथ षष्ठी सा तु सर्वैव पूर्वा स्कन्दव्रतादिषु स्कंदव्रतातिरिक्ता सप्तमी
युतैव ग्राह्या॥ षण्मुनीरिति युग्मवाक्यात्॥ माधवीये स्कान्देपि। नागविद्धा न कर्तव्या षष्ठी चैव कु
दाचन। सप्तमीसंयुता कार्या षष्ठी धर्मार्थचिंतकैरिति। अत्र पंचमीवेधः षण्मुहूर्त्तात्मको ज्ञे
यः नागो द्वादशनाडीभिः षट्कर्त्तरीतिथिमिति वचनात्। तेन षण्मुहूर्त्तेन्यून पंचमीयोगः ए
वैव॥ अस्यामेव रविवासरयोगे लोलार्कयात्रोक्ता काशीखण्डे। कृतानि पापानि नरैः सं
वत्सरादपि॥ नश्यंति तत्क्षणात् सर्वाणि षष्ठ्यर्के लोलदर्शनात्॥ लोलो लोलार्कः वार्षिकयात्रा
प्युक्ता तत्रैव॥ मार्गशीर्षस्य सप्तम्यां षष्ठ्यां वा रविवासरे। विधाय वार्षिकीं यात्रां नरः पापैः
प्रमुच्यते इति॥ आषाढस्य शुक्लषष्ठी स्कन्दषष्ठी मन्वन्तरा सा पंचमीयुता ग्राह्या। तदुक्तं स्कान्दे

स०मा०
३२

32

कृष्णाष्टमी स्कंदषष्ठी। शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदिति
।भा० कृष्णाषष्ठी योगविशेषेण कपिलाषष्ठ्युच्यते। तदुक्तं पुराणसमुच्चये। भाद्रे मास्यसिते प
क्षे भानौ वैवकरे स्थिते॥ पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत्॥ संयोगे त्वव्रतं तु नि
र्दिष्टा परमेष्ठिनेति। मार्गशुक्ला चंपाषष्ठी। तस्यां खंडेरायाख्य मल्लारिपूजा वार्त्ताकभोजना
दि मल्लारिमाहात्म्ये ज्ञात्तिगणात्तेषु प्रसिद्धं। अस्यां योगविशेषस्तत्रैवोक्तः मार्गे भाद्रपदे शु
क्लाषष्ठी वैधृतिसंयुता॥ रविवारेण संयुक्ता सा चंपेति प्रकीर्तितेति॥ तथा मार्गशीर्षे मले
पक्षे षष्ठ्यां वारे शुभमालिनः। शततारागते चंद्रे लिंगरूपा दृष्टिगोचरमिति। इयं च योगविशेषे राम०
ण पूर्वापरा वा ग्राह्या। तदभावे सप्तमीयुता कार्या पूर्वोक्तसामान्यनिर्णयादिति दिक्॥ ३॥ इ ३२
ति षष्ठीनिर्णयः॥ ॥ अथ सप्तमी॥ सा सर्वत्र पूर्वैवा षष्ठ्या मुनेरिति युग्मवचनात्। स्कंदे

पिाष श्याषुता सप्तमी च कर्त्तव्या तात सर्वदेति ॥ वैशाखशुक्लसप्तम्यां गंगापूजोक्ता ब्राह्मे वैशा
खशुक्लसप्तम्यां जह्नुना जाह्नवी स्वयं ॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्राच्च दक्षिणात् ॥ तां तत्र पू
जयेद्देवीं गंगां गगनमेखलामिति । अत्र पूर्वा व्यापिनी ग्राह्या । दिनद्वयसाम्येन पूर्वा । ॠगामि
नी एवं सामान्यनिर्णयात् । आश्विनशुक्लसप्तमी देवीपूजायां परयुता ग्राह्या ॥ युगाद्याव
षेवृद्धिसप्तमी यार्धवर्तीप्रिया । रवेरुदयमीक्षन्ते न तासु तिथियुग्मतेति: प्रतापमार्तंडे भवि
ष्योक्तेः । वर्षवृद्धिर्जन्मतिथिः । अत्रैव मूलनक्षत्रे पुस्तकस्थापनमुक्तं रुद्रयामले मूलऋक्षे तु सु
धीः पूजनीया सरस्वती ॥ पूजयेच्च महादेव यावद्वैष्णवमृक्षकं ॥ नाध्यापयेन्न च लिखेन्नाधी
यीत कदाचन ॥ पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमः ॥ संग्रहेपि ॥ आश्विनस्य सिते पक्षे
मेधाकामः सरस्वतीं ॥ मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥ माघशुक्लसप्तमी रथसप्त

स॰मा॰ ३३ 33 मीनसुच्यते। सारुणोदयव्यापिनी स्नानादौ या ग्राह्या। सूर्यग्रहणतुल्यातु शुक्लामाघस्य सप्तमी
।अरुणोदयवेलायां तस्यां स्नानं महाफलमिति वैद्धिकायां विशेषः। अरुणोदयवेलायां शु
क्लामाघस्य सप्तमी। प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति स्मृतं तत्राथ। दिनद्वये रुणो
दये चेत्स्यात्तत्रैव। षराज्ञुन्मोरिति युग्मवाक्यात्। अत्र कर्मसंभवित्व्य। सौवर्णे राजते ताम्रे मृन्मये वा
लाबुमये तथा। तैलेन वर्तिसंतप्या महारजनरंजिता।। समाहितमना भूत्वा दत्वा शिरसि दी
पकं।। भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्।। नमस्ते रुद्ररूपाय रसानां पतये नमः वरुणा
य नमस्तेस्तु हरिवास नमोस्तु ते। जले परिहरेद्दीपं ध्यात्वा संतर्प्य देवता इति।। महारजनं कु राम॰
सुंभं। परिहरेन्मुंचेत्। काशीखंडे। विशेषः लोलार्के रथसप्तम्यां स्नात्वा गंगासिसंगमे। सप्त ३३
जन्मकृतैः पापैर्मुक्तो भवति तत्क्षणादिति। इयं च षष्ठी रविवासरयोगे अतिफलदा।। षष्ठी च स

सप्तमी योगे वारश्चेदंशुमालिनः योगोयं पद्मको नाम सहस्रार्कग्रहैः समः इति स्मृतिचं
द्रोदये गार्ग्योक्तेः ॥ अर्घ्यमंत्रश्च काशीखंडे ॥ यदा जन्मकृतं पापं मया सप्तसु जन्मसु । त
न्मे रोगं च शोकं च माकरी हंतु सप्तमीति ॥ ॥ इति सप्तमीनिर्णयः ॥ ॥ अथाष्टमी
सा कृष्णा एव वा शुक्ला परा योग्या । शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धे न कर्त्त
व्या कर्त्तव्या परसंयुतेति । कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी ॥ पूर्वविद्धैव कर्त्तव्या परवि
द्धा न कुत्रचित ॥ उपवासेषु राजेंद्र एष धर्मः सनातन इति निगमात् । सर्वास्वष्टमीषु
भैरवयात्रा काशीखंडे । अष्टम्यां च चतुर्दश्यां रविभूमिजवासरे ॥ यात्रां च भैरवीं कृत्वा न
रः पापैः प्रमुच्यत इति ॥ तत्रैव । अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः । संपूज्य सततं काश्यां
दुर्गां दुर्गतिनाशिनीमिति ॥ चैत्रशुक्लाष्टम्यां विशेषस्तत्रैव । चैत्राष्टम्यां महायात्रां भवा

माःकारयेत्सुधीः॥ अष्टाधिकाः प्रकर्तव्याः शतकृत्वः प्रदक्षिणा इति। इयं च परयुता ग्राह्या। पु-
गमवचनात्॥ श्रावणे कृष्णाष्टमी द्वेधा। जन्माष्टमी जयंती च। तत्र केवला जन्माष्टमी। रोहि-
णीयुता जयंती॥ तत्राद्योक्ता स्कंदे। अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत्॥ कृष्णज-
न्माष्टमी ज्ञेया हीमघातकनाशिनीति। पुराणांतरेपि। श्रावणे बहुले पक्षे कृष्णजन्माष्ट-
मीव्रतं॥ रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति॥ जयंती तूक्ता वह्निपुराणे॥ कृष्णा-
ष्टम्यां भवेद्यत्र कलैका रोहिणी यदि। जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नत इति। स्कांदे-
पि। प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत्॥ श्रावणे बहुले सा तु सर्वपापप्रणाशिनी॥ ज-
यं पुण्यं च कुरुते जयंतीं तां विदुर्बुधा इति॥ शैवपुराणे शिववाक्यं। श्रणु वत्स प्रवक्ष्यामि अष्ट-
मीभेदनिर्णयं॥ श्रावणे कृष्णपक्षस्य घटिषष्टिर्यदा भवेत्॥ तदा जन्माष्टमी ख्याता संपूर्णा

सा प्रकीर्त्तिता॥ रोहिणीऋक्षसंयुक्ता जयंती सा ह्युदाहृता॥ जयंती परित्यज्यैव तत्त्वपुराणं नग
रपतनं इति॥ पाद्मे॥ प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः॥ यैः कृता श्रावणे मासि अष्टमी
रोहिणीयुता॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मु
क्तिदा इति॥ सोमः सोमवार इति केचित्॥ एकैकैव चेदेयं इति॥ अर्द्धरात्रे तु योगोऽयं तारापत्युद
ये सति तिथिस्तु धर्मतत्त्वे कृष्णपक्षे नालाधवाद॥ तत्र जन्माष्टमी निशा॥ येन कुर्वंति जानंतः कृ
ष्णजन्माष्टमीव्रतं॥ ते भवंति नराः प्राज्ञ व्याला व्याघ्राश्च कानने इति स्कांदे॥ करणे निष्कृतेः
श्रीजन्माष्टमीव्रतं॥ न करोति महाप्राज्ञ व्यालो भवति कानने इति च भवि
ष्ये॥ वर्णेषु बहुलेपक्षे कृष्णजन्माष्टमीव्रतं॥ न करोति महाप्राज्ञ व्यालो भवति कानने इति च भवि
ष्यात्तयं तस्यैव नित्यता काम्यात्व॥ नित्यो न्यायात् स्कांदे॥ अष्टादशेन तु पक्षापि शवहस्तस्य भोजने॥ तस्मा
पंलभते कुंतिजपंता विमुखो नरः न करोति पराविष्णोर्जयंती संभवं व्रतं॥ पमसं वशमाप

१

35

न्तः स हतेनारकी यथामिति श्च करणे प्रत्यवायश्रवणात्। काम्यार्थं तु स्कांदे। महाज
पार्थं नु कृतां जयंतीं मुक्तये थवा। धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव। ददाति वांछितानन
र्थानेवान्ये प्यतिदुर्लभान्। इति फलविशेषश्रवणात्। अस्मिंश्च व्रते उपवासः पूजा चेत्युभयं
प्रधानं। तत्र माष्टमी दिने प्राप्ते येन भुक्तं द्विजोत्तम। त्रैलोक्यसंभवं पापं तेन भुक्तं न संशय
इति स्कांदात्॥ अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हन्ति पा
पं त्रिजन्मजं। सोपवासो हरेः पूजां कृत्वा तत्र न सीदति। इति भविष्यत्पुराणाच्च फलसंबंधा
वगमादिति नव्याः तत्रः॥ चित्रोद्भिदन्निरयेत्यत्र फलसंबंधाप्रयोगभेदापत्तेः ननु पूर्वोत्तरद
न्ववाक्येषु गौरवपरिजिहीर्षया केवलफलसंबंध एव क्रियते॥ श्रावणे बहुले पक्षे कृष्णजन्मा
ष्टमीव्रतं॥ न करोति नरो यस्तु भवति क्रूरराक्षसः। इत्यादिषु कालविधायकेषु भविष्यत्पुराण

राम॰ ३५

द्विवचनेषु कृष्णजन्माष्टमीव्रतशब्दे नोभयोरुपादानात् दर्शपूर्णमासराजसूया
दिवत्प्रयोगैक्यमिति चेन्न ॥ प्रातिस्विकवाक्यैः पृथक्फलसंबंधवत्रद्धिविशेषादिवत्स
रस्परं नैमेसहसेत्तोमेति कर्त्तव्यतापाश्चात्यन्तपातभिन्नत्वेन च प्रयोगविधिः कल्प्यते। एवं चै
कशब्दोपादानमपि यद्यप्यापगुणसोमेनेमादिवन्न विरुध्यते ॥ अस्तु पृथक्प्रयो
गत्वेनेति चेन्न ॥ अभ्यंतरस्य कृतव्रतानुष्ठानपद्धतौ एकप्रयोगत्वेन विरोधात् ॥ तस्मा
त्सोपवासो हरेः पूजामितननेतरस्य कृतव्रतानुष्ठानपद्धतौ एकप्रयोगत्वेन विरोधा
त् ॥ तस्मात्सोपवासो हरेः पूजामितननंतरोपमस्ते मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्ध
रात्रके ॥ शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके। योगेऽस्मिन् वसुदेवाद्धि देवकी मा
मजीजनत् ॥ तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः इत्यादावुपवाससमुच्चयात्

36

प्रतीते॥ सत्वतो धावतीत्यादिवत्फलसंस्कारः पूजैव प्रधानं॥ एवं चोपवासस्य पारा-
र्थ्ये निर्णीते यस्तत्राकोपफलोऽस्वरसः स केवलं स्तावक एव पर्णितादिवत्॥ अंगे फल-
श्रुतिरर्थवाद इति न्यायात्॥ ननु वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये॥ उपवासं
करिष्यामि कृष्णाष्टम्यां नभस्यहं॥ अथ कृष्णाष्टमी देवी नभश्चन्द्ररोहिणी॥ अ-
र्चयित्वोपवासेन भोक्तव्यमपरेऽहनी इति भविष्यदुक्तेः संकल्पवाक्ये उपवासस्य कर्तृत्वेनोल्ले-
खात्सोऽपि प्रधानमिति चेन्न॥ अंगत्वेऽप्युपवासस्य क्रियाक्रियासंबंधिनं वा प्रकाशय-
न्मंत्रः करणत्वमजत इति न्यायात् क्रियासंबंधोपवासप्रकाशकत्वेनापि मंत्रस्य करण-
त्वोपपत्तेः उपवासेनेत्युपलक्षणोक्तौ तथा॥ उपवासस्य पूजाकरणत्वासंभवात्॥ ननु
पूर्वोदाहृतयोः पूजाफलसंबंधबोधकवाक्ययोरकरणनिंदार्थवादादेरभावात्क

थेव्रतस्यानित्यत्वोदोषइतिचेन्न॥ तन्नपुत्राप्रजायायाएवफलसंबंधेपूर्वोक्तेहतेषुश्राव
णोबहुलेपक्षेइत्यादिवाक्येषुकृष्णजन्माष्टमीव्रतशब्देनप्रजायायहणात्तयुक्तोकरणानेप्सि
र्थवादश्रवणान्नित्यत्वोदोषइति॥ तस्मादुपवासोगंप्रजैवतुप्रधानं॥ अस्याश्चप्रजायाःका
लत्वकोविष्णुधर्मोत्तरे॥ रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी॥ सप्तम्यामर्द्धरात्राधः
कलयापियदाभवेत्॥ तत्रजातोजगन्नाथः कौस्तुभीहरिरीश्वरः तमेवोपवसेत्कालंत
त्रकुर्याच्चजागरं॥ अर्द्धरात्रेतुयोगोयंतारापत्युदयेतथा॥ नियतात्माशुचिः स्नातः पूजां
तत्रप्रवर्त्तयेदिति॥ वसिष्ठस्तुसप्तम्यर्द्धरात्रस्यमुख्यकालत्वमाह॥ अष्टमीरोहिणीयु
क्तानिश्यर्द्धेदृश्यतेयदि॥ मुख्यकालः सविज्ञेयस्तत्रजातोहरिः स्वयमिति॥ मुख्यस्यप्र
धानस्यकालोमुख्यकालः अत्रकेवलाष्टमीव्रतवं॥ पूर्वेद्युरेवनिशीथव्यापिनापरेद्यु

स०भा०
३०

द्वोभयेद्युर्नोभयेद्युश्चेति ॥ तत्र प्रथमद्वितीयपक्षयोः कर्मकालव्यापित्वेनासंदिग्धै
व । अंत्ययोरपिपक्षयोः प्रातःसंकल्पकालेसत्ताधिक्याद्वपरैव । क्षयवैधत्वेपि ॥ व
र्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीति ॥ रोहिणीयुतापिचतुर्दशी ॥ पूर्वेद्युरेवनिशीथ
योगवतो । परेद्युरेवतादृशी ॥ उभयेद्युर्नोभयेद्युश्चेति ॥ तत्र पूर्वेद्युर्निशीथयुतापूर्वै
वा । कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमीतिपाद्मात् ॥ सप्तमीसंयुताष्टम्यांनि
शीथेरोहिणीयदि ॥ भवितासाष्टमीपुण्यायावच्चंद्रदिवाकराविति वह्निपुराणात् ॥ ज
यंत्यांपूर्वविद्धायामुपवासंसमाचरेदिति गारुडाच्च ॥ भविष्ये विष्णुधर्मोत्तरेच ॥ रोहि
णीमर्द्धरात्रेचयदाकृष्णाष्टमीभवेत् ॥ तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं ॥ प्रा
जापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी । सोपवासोहरेःपूजांकृत्वातत्रनसीदति ॥

राम०
३०
४२

37

।अर्द्धरात्रेतुयोगोपंतारापत्फद्दयेतथा॥ रोहिणीसहिताकृष्णामासिभाद्रपदेऽष्टमी।
।अर्द्धरात्रादधश्चोर्ध्वंकलयापियदाभवेत्॥ तत्रजातोजगन्नाथः कौस्तुभीहरिरीश्व
रः तथा समायोगेतुरोहिण्यांनिशीथेराजसत्तमासमजायतगोविंदोबालरूपीच
तुर्भुजः तस्मात्तंपूजयेत्तत्रनिशीथेराजसत्तमेति। अथविशेषस्तुविष्णुपत्नेतुपरदिनं
एवव्रति॥ तदुक्तंब्रह्मवैवर्त्ते॥ वर्ज्जनीयाप्रयत्नेनसप्तमीसहिताष्टमी॥ सऋक्षापि
नकर्त्तव्यासप्तमीसहिताष्टमीति॥ स्कांदे॥ सप्तमी विद्धेसहिताष्टम्यांभूत्वाऋक्षंद्विजोत्त
म॥ प्राजापत्यंद्वितीयेहिमुहूर्त्तार्द्धंभवेद्यदि॥ तदाष्टम्यामिकेत्तेयंप्रोक्तंव्यासादिभिः
पुरा॥ यामे।मुहूर्त्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत्।किंपुनर्नवमीयुक्ताकुलको
८ घ्यास्तुमुक्तिदेति। यदावएवंघरोहिणीरहितानिशीथगाचतिथिः परेघविरोहिणी

समा०
३८

38

सहितानिशीथास्पर्शकचतरा एवैवग्राह्या। कर्मकालशास्त्रस्यसर्वापेक्षयाप्राबल्यस्य
सर्वग्रंथसिद्धत्वात्। रोहिणीयोगेतुग्राह्यस्यात्फलातिशयमात्रंनतुतस्यनिर्णयोपयो
गिता॥ नवमीबुधवारव्रत॥ अमथाप्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः यैः कृता
श्रावणेमासिअष्टमीरोहिणीयुता॥ किंपुनर्बुधवारेणसोमेनापिविशेषतः। किंपुनर्न
वमीयुक्ताकुलकोट्यास्तुमुक्तिदेतिपाद्मवचसाएवंविधप्रशस्त्रेवर्त्तमानांसरोहिणीमप्य
ष्टमींसप्तमीबुधनवमीयुतापरैवकार्यापद्येत। यत्तुपुनर्नेयाः सप्तकर्मकालशास्त्र
सर्वापेक्षयाप्राबल्यात्तथापीयमस्मिन्व्रतेपरैवग्राह्येत्येवंविधेनप्रातिस्विकेनशास्त्रे
णबाध्यते॥ अतएवतिसुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी॥ मुहू
र्त्तमपिलभ्येतसोपोष्यासामहाफला मुहूर्त्तमप्यहोरात्रेयस्मिन्युक्तंहिलभ्यतेअ

राम०
३८

ष्टम्यां रोहिणीयुक्तं तां सुपुण्यामुपावसेदिति ॥ वह्निपुराणेऽपि ॥ कृष्णाष्टम्यां भवेद्य
त्र कलैका रोहिणी स्मृता। जयंती नाम सा प्रोक्ता उपोष्यैव प्रयत्नतः ॥ स्कांदे। उदये चाष्ट
मी किंचिन्नवमी सकला यदि। भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता। अपि वर्षशतेना
पि लभ्यते परिवानवेति ॥ ब्रह्मवैवर्ते। दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला ॥ रा
त्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति ॥ प्रातिस्विकशास्त्रस्य कर्मकालशास्त्रापेक्ष
या प्राबल्यं माधवाचार्यादिभिर्व्यवस्थापितमेवेत्याहुः तदपि न ॥ तदेव हि प्रातिस्विकशा
स्त्रं कर्मकालबाधकं यदनन्यथासिद्धं भवति ॥ संभवति तत्र समानाप्योरन्योन्यर्थः तथा हि य
३८ नाव ब्रह्मवैवर्तीयं तत्रेंदुसंयुतामिति तस्य सोमेनापि विशेषत इत्यनेनैकमूलकल्पनालाघ
वलिप्सया सोमवारपरत्वान्नास्य दिवावच्छेदेन रात्र्यवच्छेदेन वा रोहिणीकलायोगाभा

स॰मा॰ वे निशीथगायाह्येत्ययमर्थः निशीथगामकशब्दाभावात्॥ किंतुसोमवारयुक्ताविशे
३९ षेणाधिक्येनरात्रियुक्ताग्राह्येति॥ एवंचोभयदिनेनिशीथस्पर्शाभावेसोमवाराधिकरा
त्रिव्याप्तेर्निर्णायकत्वमुक्तंभवति॥ यथा॥ इंदुसंयुतामितस्यानिशीथपरत्वेपिरात्रिप
दैनैवाधिक्यरात्रिलक्षितत्वाऽहोरात्रावच्छेदेनकल्पायिरोहिणीयोगाभावेऽधिकरात्रि
व्यापिनींकुर्वीतेत्युक्ताविशेषणोत्सादिनातदपोघतो॥ सप्तमिरोहिणीयोगेइंदुसंयुत
वग्राह्येति। अथवानिशीथस्यमुहूर्त्तमात्रात्मकत्वादुभयदिनेवैषम्येणनिशीथस्प
र्शेहोरात्रेरोहिणीयोगाभावेचविशेषणाधिक्येनेंदुसंयुक्तानिशीथगायाह्या। अधि राम॰
कनिशीथव्यापिनीतिपावत्॥ रोहिणीयोगेत्वधिकनिशीथव्यापिनीमपिविहायस्व ३९
ल्पनिशीथयोगिनींरोहिणीयुक्तामेवकुर्वीतेति॥ पद्मस्कांदमुद्रपेवाष्टमीकिंविदिति

39

तत्राप्युदयशब्दस्यतारापत्युदयेसतीत्याद्येकमूलकल्पनालाघवलिप्सयावंशोद
यपरतयैवांगीकार्यः॥ नसूर्योदयपरता॥ यदित्वेवंनआख्यायतेततोयथाश्रुतवाक्य
बलाद्यदाएवंपूर्वेद्युर्निशीथेऽष्टमीमात्रसत्वमुत्तरेद्युश्चनिशीथास्पर्शिन्यष्टमीरोहिणी
युक्तावसतीपराबुधयुक्तातदैवोत्तरास्याच्चतदितरभावे॥ यावद्वचनंवाचनिकमितिर
मायात॥ यदितुबुधाभावेपिरोहिणीमात्रवशादेवोत्तरोच्यतेतदारोहिणीयोगाभावे
पिबुधमात्रसत्वादुत्तरास्यात्। एवमुत्तरायामप्येतद्वचनप्रवृत्तेःस्वीकारात्॥ कृत्स्नयो
गवचारयोगस्यापिपाशस्यहेतुत्वाच्च॥ अतोर्द्धजरतीयापत्तिः किंच। यथाएवंपूर्वेद्यु
र्निशीथेऽष्टमीमात्रसत्वेऽउत्तरेद्युश्चनिशीथात्पूर्वमृक्षयोगेबुधासत्वेचैतद्वचनादुत्त
रेद्युर्व्रतं॥ एवमेवपूर्वेद्युर्निशीथेसत्तोऽष्टमीसत्वेप्युत्तरेद्युर्बुधाधिक्यादुत्तरेद्युर्व्रताप

स०मा० त्रिः प्रथयिविताचैतद्व्वोव्याख्याद्वैतनिर्णयेकृतनिः यच्चविष्णुरहस्यस्कन्दंयदपिवह्निपुरा
४० णंष्टि तत्रमुहूर्त्तेपरे निशीथाख्यमुहूर्त्तेपरंकलापरंतद्वर्त्तिकलापरमितिनविरोधः।।
वस्तुतस्त्वेतद्वाक्यद्वयमुभयदिनेनिशीथेष्टमीव्याप्त्यभावव्याप्त्यभावैकदेशव्याप्तिगोचरसावका
40
शमतोनकर्मकालव्याप्तिबाधकं।। तस्मात्कर्मकालशास्त्राबाधात्पूर्वैवग्राह्या। यदि
तुजयंती व्रतेजन्माष्टमीव्रताद्भिन्नंतदातद्व्रतंपरेहनिनतुजन्माष्टमीव्रतं।। यत्तुमा
धवाचार्यैर्जयंती व्रतेनजन्माष्टमीव्रतस्यप्रसंगासिद्धिरभ्यधायि। तन्न। कालभेदात।
योपिचतैरेवनामभेदान्निमित्तभेदाच्चुद्भिन्नत्वभेदान्निर्देशभेदाच्चकर्मभेदउक्तं राम०
ःसोप्ययुक्तः कार्मनामधेयभेदहिस्यात्कर्मभेदः नद्यत्रजयंतीशब्दः कर्मनामकिं ४०
तुरोहिणीसहितायाअष्टम्याः रोहिणीचयदाकृष्णपक्षेष्टम्यांद्विजोत्तम।। जयंती

नामसा प्रोक्ता सर्वपापहरा तिथिरिति विष्णुधर्मोत्तरात्॥ यदपि रूपभेदादित्युक्तं तत्र रू-
पशब्देन धात्वर्थभेदो गुणाभेदो वाभिप्रेतः नाद्यः कर्मभेदसाधकतया भिन्नाधिकरणो-
पन्यासासंगतेः न द्वितीयः भिन्नाधिकरणे धात्वर्थभेदादृष्टेः सिद्ध्यति। नांत्यः॥ उत्पत्तिशिष्ट-
स्य गुणस्य वाक्यांतरेणाश्रवणात्। निमित्तभेदस्य शुद्धमिश्रत्वभेदनिर्देशभेदानां तु कर्मभे-
दकत्वेन क्वाप्यसंमतत्वात्॥ ननु जन्माष्टमी जयंती च शिवरात्रिस्तथैव च॥ पूर्वविद्धै-
व कर्त्तव्या तिथिभांते च पारणमिति भृगुवाक्ये नन्यपरत्वेनः श्रवणाल्लक्षणादभ्यासा-
देव भेद इति चेन्न एतस्य वचसो जन्माष्टमीमत्स्यादिजयंत्यनुवादेन पूर्वविद्धत्वगुण-
मात्रविधायकत्वेनाप्युपपत्तेः। अथ यथा पूर्वोदाहृतेषु वाक्येषु उपवसेत् जयंत्यां सपर्या-
य धातुनिष्पन्नाख्यातरूपाच्छब्दांतरादेव भेद इष्यते तत्र शब्दांतरेणोपवासस्य ज्ञ-

सं॰मा॰ योर्भेदस्युपवासस्यप्रज्ञांगत्वस्यप्राक्स्थापितत्वेननस्नानत्रेणाकालनिर्णयप्रयोजकत्वं।
४१ प्रकरणांतरान्नेदइतिचेन्न॥ उपलभ्यमानस्मृतिपुराणादिषुअसंनिधानुपलंभात्॥ य
द्विस्यात्तदाकिमितीमंराजमार्गविहायसुहृद्मिश्रत्वादिकुमार्गोमाधवाचार्यैराश्री
येत। एवमपिस्वमात्रसात्त्विकत्वेनप्रकरणांतरादेसमाश्रीयमाणोभवतुजयंती
व्रतंपरेहनि॥ जन्माष्टमीव्रतेतुसप्तम्युत्तरदिनेनिशाथ्याष्टम्यापिन्याअष्टम्यारोहिणी
योगेपूर्वेदिनेवकेवलीयानिशीथयोगेपूर्वैवग्राह्येतिदिक्॥ ॥अथजन्माष्ट
मीव्रतप्रयोगः॥ ॥व्रतपूर्वदिनेदंतधावनंकृत्वोपवासदिनेप्रातः सूर्यः सोमो राम॰
यमः कालः संध्येभूतान्महः क्षपा। पवनोदिक्पतिर्भूमिराकाशंखचरानराः ब्रा ४२
ह्मशासनमास्थायकल्पध्वमिहसंनिधिमित्युक्त्वासफलपुष्पाक्षतजलपूर्ण

41

ताम्रपात्रमासाद्य गृहीत्वामुकफलकामः पापक्षयकामो वा कृष्णप्रीतये कृष्णजन्मा
ष्टमीव्रतं करिष्ये इति तु यावा वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ॥ उपवासं करिष्यामि
कृष्णाष्टम्यां नभस्यहं ॥ अद्य कृष्णाष्टमी देवी नभश्चन्द्ररोहिणी ॥ अर्चयित्वोपवासे
न भोक्ष्येहमपरेहनि ॥ एनसो मोक्तुकामोस्मि यद्गोविन्द त्रियोनिजं ॥ तन्मे मुंच तु मां त्राहि
पतितं शोकसागरे ॥ आजन्ममरणं यावद्यन्मया दुष्कृतं कृतं ॥ तत्प्रणाशय गोविन्द प्रसी
द पुरुषोत्तमेत्फलपात्रस्थं जलं क्षिपेत् ॥ ततः कदलीस्तम्भवासोभिराम्रपल्लवयुत
सजलपूर्णकलशैर्दीपैः पुष्पमालाभिर्युतमगरुधूपितं अग्निखड्गकृष्णच्छागरक्षा
मणिहारन्यस्तमुसलादियुतं मंगलोपेतं षष्ठ्यादेव्याधिष्ठितं देवक्याः सूतिकागृहं वि
धाय तस्याः समन्ताद्भित्तिषु सकुसुमांजलीन् देवगन्धर्वादीन् खड्गचर्मधरवसुदेवदे

सभा० वकीनंदयशोदागर्गगोपीगोपान्कंसनियुक्तान्गोधेनुकुंजरान्यमुनांतन्मध्येकालियं
८२ अमध्वनत्कालीनेगोकुलचरितंयथासंभवंलिखित्वासूतिकागृहमध्येप्रच्छदपटाद्बहिर्मंड
केस्थापयित्वामध्याह्नेनद्यादिजलेतिलैःस्नात्वाऽर्धरात्रेसपरिवारश्रीकृष्णपूजांकरिष्ये
इतिसंकल्प्यकांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा॥ वार्क्षीमणिमयीचैववर्णकैर
५२ लिखितातथवेत्युक्तान्यतमेनप्रतिमांविधायअग्न्युत्तारणंकृत्वाप्रतिमाकपोलौस्पृ
ष्ट्वातद्देवतानांमूलमंत्रेणप्रणवादिचतुर्थ्यंतेनामवाअस्मैदेवत्वसंख्यायैस्वाहेतिचमं
त्रंपठन्प्राणप्रतिष्ठांकुर्यात्॥ अस्माइमस्थापनेतत्तद्देवतानामयाद्यं॥ गायद्भिः राम०
किंनराद्यैःसततपरिवृतावेणुवीणानिनादैः शृंगारादर्शकुंतप्रवरकृतकरैःकिंन ८२
रैःसेव्यमानां॥ पर्यंकेसास्तृतेयामुदिततरमुखीपुत्रिणीसम्यगास्तेसादेवीदेवमा

ताजयतिसुवदनादेवकीरियरूपाइतिदेवकींमांचापिबालकंसुप्तिपर्यंकेस्तनपायिनं॥
श्रीवत्सवक्षसंशांतंनीलोत्पलदलछविमिति श्रीकृष्णंच ध्यात्वाइ नमोदेव्यैश्रियेइतिश्रियं
।देवकीसहितंवसुदेवं।यशोदासहितंनंदं।श्रीकृष्णसहितंबलदेवं।चंडिकांचानमोंतेनोम
मंत्रैः पूजयेत॥ तत्रमंत्राः योगेश्वरायदेवाययोगानांपतयेविभो॥ योगोद्भवायनित्या
ययोगविदायनमोनमः स्नाने॥ यज्ञेश्वरायदेवायतथायज्ञोद्भवायच॥ यज्ञानांपतयेना
थगोविंदायनमोनमः धूपादौ॥ विश्वेश्वरायदेवायतथाविश्वोद्भवायच॥ विश्वस्यपत
येतुभ्यंगोविंदायनमोनमः नैवेद्ये॥ गारुडेतु। यज्ञाययज्ञेश्वरायययज्ञपतयेयज्ञसंभ
वायगोविंदायनमोनमइत्यर्घं सर्वेषांयज्ञपदानांस्थानेयोगपदान्युक्त्वायमेवमंत्रः स्नाने
विश्वायविश्वेश्वरायेत्यादुक्त्वानैवेद्ये। धर्मायधर्मेश्वरायेत्यादिः स्वाहांतस्तिलहोमो विश्वेश्व

रायेत्सारिः शायनो सोमाय सोमेश्वरायेत्सारिश्रीइ एजायामिति मंत्रजज्ञात ॥ ततो ग
मघृतेना मौवसोद्धाराः कविडुउ घृतेनेति ॥ ततो जातकर्मनालछेदषष्ठी एजानामक
र्माणि ॥ ततश्च ञ्चदये रोहिणीयुतं चंद्रकुंडिले प्रतिमायां वा नाममंत्रेण संपूज्य शंखे
तोयसमादाय सपुष्पकुशचंदनं ॥ जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत ॥ क्षी
रोदार्णवसंभूत अत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यं शशांकेमं रोहिण्या सहितोममेति
ततो सोमस्याः पतये त भंज्योतिषां पतये नमः नमस्ते रोहिणीकांत सुधावास नमो
स्तुते । नमो मंडलरूपाय क्षिरोरत्नाय धूर्जटे ॥ कलाभिर्वर्द्धमानाय नमश्चंद्राय चारवे इ
ति प्रणामेत् । ततः ॥ अनघं वामनं शौरिं वैकुंठं पुरुषोत्तमं ॥ वासुदेवं हृषीकेशं माधवं
मधुसूदनं ॥ वराहं पुंडरीकाक्षं नरसिंहं दैत्यसूदनं ॥ दामोदरं पद्मनाभं केशवं गरुड

भुजं।गोविंदमच्युतंकृसमनंतमपराजिति॥ अधोत्तमंजगद्धीजिसर्गस्थितिसंतकारिणीं।
अनादिनिधनंविष्णुत्रिलोकेशंत्रिविक्रमं॥ नारायणंचतुर्बाहुंशंखचक्रगदाधरं॥ पी
तांबरधरंनित्यंवनमालाविभूषितं॥ श्रीवत्सांकंजगत्सेतुंश्रीकृसंश्रीधरंहरिं॥ शरणंत
प्रपद्येहंसर्वकामार्थसिद्धये॥ प्रणमामिसदादेवंवासुदेवंजगत्पतिमितिमंत्रैः प्रणा
मत्त्राहिमांसर्वलोकेशहरेसंसारसागरात॥ त्राहिमांसर्वपापघ्नदुःखशोकार्णि
वात्प्रभो।सर्वलोकेश्वरत्राहिपतितंमांभवार्णवे॥ देवकीनंदनश्रीशहरेसंसारसाग
रात॥ त्राहिमांसर्वदुःखघ्नरोगशोकार्णवाद्धरे॥ दुर्गतांस्त्रायसेविष्णोयेस्मरंतिसकृ
त्सकृत॥ सोहंदेवातिदुर्वृत्तस्त्राहिमांशोकसागरात॥ पुष्करात्तनिमग्नोहंमायावि
ज्ञानसागरे॥ त्राहिमांदेवदेवेशत्वत्तोनान्योस्तिरक्षिता॥ यद्बाल्येयच्चकौमारेयौ

२४ दिनाजागरणं कृत्वा द्वितीये ह्निप्रातः कात्वानंतरं संकल्प पूर्ववद्देवमर्च्य

स·मा· वनेयद्ववार्दके॥ तस्मात्त्वं रक्षमां प्रोतु पापं हरहलायुधेति मंत्रैः प्रार्थयेत॥ तत
४४ स्तोत्रपठनपुराणश्रवणाभ्यां भोजयित्वा तेभ्यः सुवर्णधेनुवस्त्रादिकं सोमेशायतामि
तिदत्वा। यं देवं देवकी देवी वसुदेवादजीजनत॥ भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मा हि ४
44 त्मने नमः। सुजन्मवासुदेवाय गोब्राह्मणहिताय च॥ शांतिरस्तु शिवं चास्तित्वत्प्रसादा
दिति मामुद्धारस्पतां ब्राह्मणाय दत्वा पारणं कृत्वा व्रतं समापयेत॥ सर्वाय सर्वेश्व
राय सर्वाय सर्वपतये सर्वसंभवाय गोविंदाय नमो नम इति पारणायां। भूताय भ
तेष्वपतय इत्यादि समापने च मंत्रः। उद्यापनमनुक्तत्वान्नास्ति। एवं यथोक्ततिथौ व्र राम·
तं कृत्वा परदिने पारणं कुर्यात॥ ब्रह्मवैवर्ते॥ अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं ४४
क्वचित॥ हन्यात्पुराकृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं॥

तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणमिति॥ तत्र दिवसे उभयांते पारणमिति मुख्य
कल्पः एकतरांतस्त्वनुकल्पः तत्र यदि तिथिनक्षत्रयोरन्यतरस्य वांतो रात्रौ भवति तदांत
द्रात्रौ न कुर्यात्किंतु दिवैव॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते। अन्यथा पुण्यहा
निः स्याद्धृते धारणपारणमिति ब्रह्मवैवर्ते निषेधात्। अन्यतिथ्यागमो रात्रौ तामसस्ते
जसो दिवा॥ तामसे पारणां कुर्वंस्तामसीं गतिमश्नुत इति गारुडपुराणाच्च॥ यत्तु केन चि
दुक्तं। तिथिनक्षत्रयोगाद्दिवा पारणासंभवे रात्रावपि कार्यं तदुक्तं माधवीयसम्व
त्सरे। तिथ्यक्षयोर्यदा छेदो नक्षत्रांतमथापि वा॥ अर्धरात्रेऽपि वा कुर्यात्पारणं त्वपरेऽहनी
ति ब्रह्माण्डपुराणेऽपि। न रात्रौ पारणां कुर्यादृते वै रोहिणीव्रतात्॥ तत्र निश्यपि तत्कुर्याद्वर्ज
यित्वा महानिशामिति। एवं दाहृतं तत्सामान्यवाक्यद्वयं जन्माष्टमीपारणातिरिक्तपा

स॰भा
४५
45

रणापरमितितन्त्र। ब्रह्मांडीयवचनेतावदपिशब्दश्रवणादंपिवेदांतगं रणाइतिवचना
र्यत्सौगेनोभयांतादरः प्रतीपतेनरात्रिविधिः वकतवमेतस्यपुज्यते। यदपितिथ्यन्तयो
रितिवचनांतत्राप्येकंपदमेकत्रान्वितमन्यत्रविनाबलवदनुपपद्यमानान्वेतीतिमाया
र्द्धरात्रेयदोभयांतस्तदावचनांतरबोधितेदिनएवपारणांकुर्यान्नत्वर्द्धरात्रेपारणा
मितिसिद्धं परं। नापश्चायंतन्त्रतोयेसिद्धः यथाचमसमन्मांश्चमसाच्यमासिनोभक्षयंति
त्यत्रैतस्यहारियोजनस्यसर्वएवलिप्संतइत्यत्रचमसिपदस्यहारियोजनान्वया
नभ्युपगमात्।। किंच।। तथापिचपरेहनीतस्याविवक्षांगीकृतएव।। अन्यथा राम॰
त्तेतापदिनेपारणापत्तिः यदप्यत्रमीवचेनोक्तं। अर्द्धरात्रशब्देनरात्रिमात्रं गृह्यतइति। ४५
तदपिप्रमाणाभावेनैवापास्तं। पद्यविज्ञानतदादिनस्येवग्रहणौचित्यात्।। तस्मादस्मदुक्त

एवपत्नुः स्वेपान। तत्र शक्रध्वजयांते ऽशक्रस्वप्नतरांते उत्सवांते वा। तिष्यांते वोत्सवांते वा

व्रती कुर्वीत पारणमिति कालादर्शादि निबंधवचनात्॥ उत्सवांते जामरायुत्सवांते॥ ॥

भाद्रशुक्लाष्टमी दूर्वाष्टमी। भविष्ये। शुक्लाष्टमीतिथिर्यातु मासि भाद्रपदे भवेत्। दूर्वाष्ट

मी तु सा ज्ञेया नोत्तरा सा विधीयत इति॥ इयं च पूर्वविद्धा॥ तदुक्तं ह्यघमेन॥ श्रावणी दुर्गन

वमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति॥ अत्र च स्त्रीणामेवा

धिकारो न पुंसां॥ या न पूजयते दूर्वां मोहात्स्त्री हयथाविधि॥ जन्मानि त्रीणि वैधव्यं ल

भते नात्र संशयः। तस्मात्संपूजनीया सा प्रतिवर्षं च यत्नतः॥ इति चंद्रप्रकाशे पुराणसमु

च्चये। करणे वैधव्यरूपानिष्टश्रुतः अत एव नित्यमपीदं॥ इदं च व्रतं भाद्रशुक्लेऽगस्त्यो

दयसंभावनायां भाद्रकृष्णाष्टम्यां कार्यं॥ शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी॥ सिं

स०प्रा० ४६ सिंहार्कएवकर्त्तव्यानकन्यार्केकदाचन॥ सिंहस्थेचोत्तमासूर्येनुदितेसुनिसत्तमेद्र
मेदतिगोविंदाखर्विलंकादात॥ अत्रकृत्सभुक्तमेदनरत्नेमविष्यत्सुरारणे॥ शुचौदेशेप्र
ज्ञातायांदूर्वायांब्राह्मणोत्तम॥ स्थाप्यलिंगंततोगंधैःपुष्पैर्धूपैःसमर्चयेत॥ दध्या
46 हर्द्विजश्रेष्ठअर्घंदत्वात्रिलोचने॥ दूर्वांशमीम्पातिविधिवत्तत्रजयेछुद्धयायुतः॥ त्वम
मः त्वंदूर्वेमृतजन्मासिवंदितासिसुरासुरैः॥ सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव
॥यथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले॥ तथाममापिसंतानंदेहित्वमजरा
मरमितिमंत्रनियमोपिमविष्ये॥ अनग्नियक्त्ममश्नीयादन्नंदधिफलंतथा॥ अस्तार राम० ४६
लवरांब्रह्मचर्यान्मधुनासुतमिति॥ इयंवर्ज्येष्टामहनक्षत्रमरौहिणमुहूर्त्तेव्यापि
नीग्राह्या॥ मुहूर्त्तेरौहिणेयस्मांपूर्वांवायदिवापरा॥ दूर्वाष्टमीतुसाकार्याज्येष्ठांमूलवे

वर्जयेदिति पुराणसमुच्चयात् । दिनद्वये रोहिणीज्येष्ठामूलयोगेन तदभावे वा पूर्वैवाग्राह्
णा दुर्गनवमीति एवोक्तवाक्यात्॥ अत्रैव ज्येष्ठापूजनं लैंगे। कथाकैयाष्टमी शुक्ला ज्येष्ठते
महती स्मृता॥ अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत्॥ तथा। मासि भाद्रपदे शुक्ले प
क्षे ज्येष्ठर्क्षसंयुते। यस्मिन् कस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति। स्कान्देऽपीयं ज्येष्ठा
[redacted] योगवशेन ग्राह्या। नक्षत्रयोगाभावे तु परैव पूर्वेद्युरात्रौ नक्षत्रयो
गात् पूर्वैव॥ तथा च तत्रैवा नवमीसहिता कार्या अष्टमी नात्र संशयः मासि भाद्रपदे शु
क्ले पक्षे ज्येष्ठर्क्षसंयुते॥ रात्रिर्यस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति। तत्रैव। यस्मि
न् दिने वै ज्येष्ठामध्याकाद् ऊर्ध्वमप्यणुः तस्मिन् विधिपूजा च यस्मिन्नाचेत् सर्ववासर इति। महा
लक्ष्म्यष्टमी प्राप्य तत्र यात्रा कृता न्तराणां॥ संपत्तिं तेहति विवत्समासमनमुच्चति इति। व्रत

स॰मा॰ वंतस्तुएतद्दारभ्याश्विनशुक्लाष्टमीपर्यंतंषोडशदिनानिप्रमहंयात्रांकुर्युरितिशिष्टाः
४७ अत्रव्रतमुक्तंपुराणसमुच्चये।श्रियोर्चनंभाद्रपदेसिताष्टमीप्रारभ्यकमासमतेचसूर्ये
।समापयेत्तत्रतिथौचयावत्सूर्यस्तुपूर्वार्द्धगतोयुवत्याइति।कन्यामगतेसिंहस्थेसूर्येप्रा
प॰ रंभः युवत्याःकन्यायाःपूर्वार्द्धेसूर्येवस्थितेसतिसामान्यविधिरितिसर्वः प्रथमारंभएवायंनियम
:षोडशवार्षिकेतत्प्रयोगगणनदिनतीयादिवर्षेतुननियमः एतच्चार्द्धरात्रातिक्रमवर्जितमा
मष्टम्यांकार्यमर्द्धरात्रयतिक्रम्यवर्जितेयोन्नरातिथिः नहिततसांतिथौकार्यंमहालक्ष्मी राम॰
व्रतंसदेतिविष्णुप्रकाशिकायांततरात्॥ आश्विनशुक्लाष्टमीमहाष्टमीत्युच्यते॥ तथाच ४७
ब्रह्मपुराणे॥ तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी॥ प्रादुर्भूतामहाघोरायोगिनी
कोटिभिर्वृता। तत्राश्विनशुक्लपक्षे। अतोत्रपूजनोपासनास्मिन्नहनिमानवैः॥

47

नि॥ इयं चाष्टमी नवमी पुत्रकाय्या ग्रा॥ तथा च देवीपुराणे॥ सप्तमीवेधसंयुक्ता यैः कृता
तु महाष्टमी॥ पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवदिति॥ मदनरत्ने स्मृतिसंग्रहेऽपि॥ शरन्म
हाष्टमी पूज्या नवमीसंयुता सदा॥ सप्तमीसंयुता नित्यं शोकसंतापकारिणी॥ जंभेन स
प्तमीयुक्ता पूजिता च महाष्टमी॥ इन्द्रेण निहतो जंभस्तस्माद्दानवपुंगवः॥ तस्मात्सर्वप्रय
त्नेन सप्तमीसहिताष्टमी॥ वर्जनीया प्रयत्नेन मनुजैः शुभकांक्षिभिः॥ सप्तमीकलया यत्र
परतश्चाष्टमी सहिताष्टमी भवेत्॥ तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदं॥ तथा पुत्रान्हंति पशून्
निहंति राष्ट्रं स राजकं॥ हंति जातानजातांश्च सप्तमीसहिताष्टमीति॥ ब्रह्मवैवर्ते॥ अल्पा
प्यष्टमी चैव शुक्लपक्षे वरानने॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति॥ वसुरंध्रयोरिति
युग्मवचनेच॥ अत्र त्रिमुहूर्त्तन्यूनापि सप्तमीवर्जनप्रयोजिका न त्रिमुहूर्त्तैव॥ तथा च पुरा

यत्तु निशायां पूजिता देवी वै कुर्वी पापनाशिनी। तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेत् इति। आयि
[illegible]
सन्नाचिन्तिं। विधिवत्कालिकां [illegible] देवीपुराणे [illegible]

स·मा· ४८

णो॥ सप्तमी शल्यसंयुक्ता वर्जनीया सदाष्टमी॥ स्तोकापि सा तिथिः पुराणा यस्यां सूर्योद-
यो भवेदिति॥ स्तोका कलाकाष्ठादिमात्रापीत्यर्थः॥ इयमेव भौमयुक्ताति प्रशस्ता॥ अष्ट-
म्यामुदिते सूर्ये दिनान्ते नवमी भवेत्॥ कुजवारो भवेत्तत्र पूजनीया प्रयत्नत इति मत्स्योक्ते-
स्तेनतरात् नवमीयुक्तालाभे तु सप्तमीयुतैव कार्या। तत्र रात्रिपर्वसत्त्वम्यापि युता कार्याम्-
लेनापि विशेषतः इत्यादीनि वचनानि॥ नवरात्राशक्तौ त्रिरात्राद्युक्तं देवीपुराणे॥ नवरात्रव्र-
तेऽशक्तस्त्रिरात्रकं॥ व्रतं चरति यो भक्तस्तस्मै दास्यामि वांछितमिति॥ केवलाष्टम्युपवास-
स्तु पुत्रवता न कार्यः उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्॥ यथा तथा वा पूतात्मा व्रती
देवीं प्रपूजयेदिति कालिकापुराणात्॥ मार्गशीर्षकृष्णाष्टम्यां काशीविडे काशीवासनि-
र्विघ्नतार्थं कालभैरवपूजोक्ता॥ कृत्वा च विविधां पूजां महासंभारविस्तरैः नरो मार्गसि-

रा·म· ४८

ताश्चमर्गा वार्षिकी विद्युन्मुत्सृजेदिति तानत्रैवृती र्थैकालोदके स्नात्वा कृत्वा तर्पणमतन्द्रः
विलोक्य कालराजानं निरयादुद्धरेत्पितॄनिति उपोषणमप्युक्तमस्यामेव काशीखंडे मा
र्गशीर्षसिताष्टम्यां कालभैरवसंनिधौ उपोष्य जागरं कुर्वन् सर्वपापैः प्रमुच्यत इति ॥ अत्रै
पोषणांगतयार्घदानमपि कार्यमिति शिवरहस्ये ॥ अत्रोपवासजागरणयोः प्रधानयो
रहोरात्रसाध्यत्वेनाहोरात्रयुता पूर्वविद्धा ग्राह्या ॥ अहोरात्रव्रतं यच्च एकमेकतिथौ गते
॥ तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रतीति स्मृतेः ॥ यत्तु पूर्वदिने सायाह्ने उत्तरे प्रदोषे
तुल्यात्तदपि पूर्वैव ॥ रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिरिति ब्रह्मवैवर्तात् ॥ यत्तु क
श्चिदुपोषणस्यांगभूतमर्घ्यदानमिति शिवरहस्यात्तदुपोषणमेव प्रधानं न जागरणमि
ति तन्न तुच्छं ॥ अर्घ्यदानस्योपोषणांगत्वे पि जागरणोत्सवायोगात् ॥ यदपि मध्याह्ने संख्य

स·मा· ४९ भैरवाविर्भावपञ्चम्यन्त सोयरूपार्चनघामन्ता श्रीकालभैरवः आविरासीत्ततो लोकान्
भीषयन्नखिलान् पाति। शिवरहस्ये मध्याह्ने कालभैरवाविर्भावात्तद्व्यापिनी ग्राह्येति क
थितं॥ तदपि तुच्छं शिवरहस्ये। मध्याह्ने त्वरं कृत्तिवासेश्वरं प्रापुर्देवाविल्वादिसाधना
इत्यादिनाभूयः कर्मकालाद्यमुक्त्वा भैरवाविर्भावं चोक्त्वा तु परमेव स्पृर्योद्यस्त्वमुपा
49 गमद्दितकं। तत्र मध्याह्ने पराह्ने सायाह्ने वाविर्भावानिश्चयात्। अस्तु वा मध्याह्ने आ
विर्भावस्तथापि तत्कालीनग्राह्यतायां मानाभावः न ह्याविर्भावकालीना ग्राह्येति वा
क्यमस्ति किंचित्॥ जन्माष्टम्यादौ तु एतादृशकर्मकालत्वेन निशीथव्यापिनी ग्राह्येत्यु राम०
२ क्तं॥ न जन्मकालत्वेनेति सत्त्वेयः माघशुक्लाष्टम्यां भीष्मतर्पणं श्राद्धं चोक्तं हेमाद्रौ ४९
पाद्मे। माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणं॥ श्राद्धं च ये नराः कुर्युस्ते स्युः सं

संततिभागिनइति॥ तर्पणमंत्रस्तुभारते। भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः॥
आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियां॥ वैयाघ्रपादगोत्रायसांकृत्यप्रवरायच॥ अ
पुत्रायददाम्येतज्जलंभीष्मायवर्मणे॥ वसूनामवतारायशंतनोरात्मजायच॥ अर्घ्यं
ददामिभीष्मायआबाल्यब्रह्मचारिणइति। याम्ये। ब्राह्मणाद्यास्त्रयोवर्णादद्युर्भीष्मा
यनोजलं॥ संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेति। इदंचजीवत्पितृकोपिकुर्यात्। नि
षेधाभावात्॥ यत्तुसपितुःपितृकृत्येषुनाधिकारःकथंचनेति। निषेधःसपित्र्यकर्मप
रइतिदिक्॥ ॥इत्यष्टमी॥ ॥अथनवमीसातुपूर्वविद्धासुरंध्रयोरितियुग्मवचनात्॥
ब्रह्मवैवर्तेपि। अष्टम्यानवमीविद्धाकर्तव्याफलकांक्षिभिः नकुर्यान्नवमींतातदशम्या
तुकदाचनेति चैत्रशुक्लनवमीरामनवमीसापरविद्धामध्याह्नव्यापिनीग्राह्या॥ तदुक्त

समा० ५० मगस्त्यसंहितायां॥ चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि॥ सैव मध्याह्नयोगेन महा-
पुण्यतमा भवेदिति। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोषणं नवम्यां वै द-
शम्यां पारणं भवेदिति वचनाच्च॥ तत्रैव चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः पुनर्वसु-
र्क्षसंयुक्ता सा तिथिः सर्वकामदा॥ श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका॥ तथा।
50
केवलापि सदोपोष्या नवमीशब्दसंग्रहात्॥ तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रते
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं॥ तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः अ-
त्र पूर्वेद्युरेव मध्याह्नव्यापिनी चेत्पूर्वा॥ दिनद्वये तद्व्याप्तावव्याप्तावेकदेशसमव्याप्तौ वा राम० ५०
सत्यत्र चेत्पूर्वा मध्येऽन्यत्रेति। अष्टमीविद्धानिषेधादिति॥ तत्रैव। यस्तु रामनवम्यां तु
भुंक्ते मोहाद्विमूढधीः॥ कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः उत्तमकरणे प्रत्यवायश्च

तेष्वकाम्यं रामनवमीव्रतीयन्तु तन्नकानामेवनित्यमितितन्त्रसंकोचेमानाभावात्॥ ज
न्माष्टमीशिवरात्र्यादिव्रतेष्वितथात्वापत्तेः॥ अथव्रतपद्धतिः व्रतपूर्वदिनेमायंदंत
धावनं। व्रतदिनेचप्रातः सूर्यः सोमोयमः कालः संध्येभूतान्यहः क्षपा॥ पवनोदि
क्पतिर्भूमिराकाशं खचरानराः ब्राह्मंशासनमास्थायकल्पध्वमिहसंनिधिमितिजल
फलपुष्पाक्षतसहितजलपूर्णं ताम्रपात्रं गृहीत्वा मासाद्युल्लिख्यपापक्षयकामोमुक्ति
फलकामोवाश्रीरामचंद्रप्रीतयेश्रीरामनवमीव्रतमहंकरिष्ये। उपोष्यनवमींत्वद्य
यामेष्वष्टसुराघवतेनप्रीतोभवत्वंभोःसंसारात्त्राहिमांहरे इत्यंजलिनाजलंक्षि
पेत्॥ ततः शक्तितोहेमीं रामप्रतिमांकृत्वाग्न्युत्तारणपूर्वकंकपोलोमस्पर्शामलमंत्रप्राण
वादिचतुर्थ्यंतेनामरामायदेवत्वसंख्यायेस्वाहेतिचमंत्रेयठनप्राणप्रतिष्ठांकुर्यात्ततो

51

तः कोमलांगं विशालाक्षमिंद्रनीलसमप्रभं ॥ दक्षिणांगे दशरथपुत्रावेक्षणतत्परं ॥
रघुतो लक्ष्मणं देवं सच्छत्रं कनकप्रभं ॥ पार्श्वे भरतशत्रुघ्नौ तालवृंतकराबुभौ ॥ अग्रे
व्यग्रहनूमंतं रामानुग्रहकांक्षिणमिति ध्यात्वा षट्कोणमध्ये पूजयेत्। श्रीरामप्रतिमा
समीपे वह्निकोणमध्ये कौशल्यां दशरथं च पूजयेत् षट्कोणेषु रां हृदयाय नमः ॥
रीं शिरसे स्वाहा। रूं शिखायै वषट् ॥ रैं कवचाय हुं। रौं नेत्रत्रयाय वौषट्। रः अस्त्राय
फट् इति हृदयादीनि षट्। षट्कोणबाह्ये अष्टदलकमलदलमूलेषु हनूमंतं सुग्रीवं
भरतं विभीषणं लक्ष्मणमंगदं शत्रुघ्नं जांबवंतं च दलमध्येषु धृष्टिं जयंतं विजयं सुराष्ट्रं
राष्ट्रवर्द्धनमकोपं धर्मपालं सुमंत्रं च दलाग्रेषु इंद्राग्नियमनिर्ऋतिवरुणवायु
कुबेरमीशानं चाष्टौ लोकपालान्। तदग्रे वज्रं शक्तिं दंडं खड्गं पाशमंकुशं गदां च

लंचेति तेषामापृष्ठानि च पूजयेत ।। श्रीरामपूजायां मूलमंत्रः वैदिको वा वैसवः प्रण
वादि चतुर्थ्यंतं नमोंतं नाम वा मंत्रः इंद्रोग्निश्च यमश्चैव नैर्ऋतो वरुणोनिलः कुबेर ईशो
ब्रह्मा हि दिक्पालाः स्वापपंक्तत इति स्थाने । राम स्वं जननी चासि रामात्मकमिदं जगत्
।। अतस्त्वां पूजयाम्यघ लोकमातर्नमोस्तु ते इति कौशल्यापूजायां ।। ॐ नमो दशर
थायेति दशरथपूजायां । इतरेषां मूलमंत्रः प्रणवादि चतुर्थ्यंत नमोंत नामानि वा । उ
च्चस्थे ग्रहपंचके सुरगुरौ सेंदौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि ।।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणेराविर्भूतमभूतपूर्वविभवं यत्किंचि
देकं महः इति मध्याह्ने जन्मभावना ।। वाद्यादिवादनं च पुष्पांजलिः । वैकं फलपुष्पांबुसंपूर्णं
ग्रहीत्वा शंखमुत्तमं ।। अशोकरत्नकुसुमैर्युक्तं च तुलसीदलैः दशाननवधार्थाय च

स॰मा॰ र्मसंस्थापनाय च ॥ दानवानां विनाशाय दैत्यानां निधनाय च ॥ परित्राणाय साधूनां जा
५२ तो रामः स्वयं हरिः । गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम ॥ इति मन्त्रेणार्घ्यं दद्यात् ॥ पुष्पा
ञ्जलिं पुनर्दत्वा यामे यामेऽर्चनं ततः । पूजयन् विधिवद्भक्त्या दिवारात्रं नयेद्बुधः इति ततः स्तो
त्रपाठपुराणश्रवणादिभी रात्रौ जागरणं कृत्वा द्वितीयेऽह्नि प्रातः कालीनं नित्यं कृत्वा पूर्व
वद्देवं श्रीरामं परिवारदेवताश्च संपूज्य विप्रान् संभोज्य श्रीरामो मे प्रीयतामिति तेभ्यः सुव
र्णधेनुवस्त्रादि दत्वा प्रतिमामुपस्कृतां विप्राय दत्वा पारणं कृत्वा व्रतं समापयेत् ॥ अश्वि
नशुक्लनवमी महानवमीत्युच्यते । तदुक्तं प्रतापमार्तण्डे लैङ्गे । दुर्गापूजासु नवमी मूलाद्य रा॰म॰
त्रयान्विता ॥ महती कीर्तिता तस्यां दुर्गां महिषमर्दिनीमिति । पूजयेदिति शेषः । तत्र पूर्ववि ५२
द्धा प्रकर्त्तं शिवरात्रिर्बलेर्दिनमिति । अस्यामेव दुर्गापूजनहोमबलिदानादिकार्यमिति
व्या

राजमार्त्तण्डे ॥ नवम्यां च जपं होमं समाप्य विधिवद्बलिम् इति ॥ ब्रह्मवैवर्त्तेऽपि । अत्रापरा
ह्णिके काले बलिदानं प्रशस्यते ॥ दशम्यां वर्जयेत्तत्र नात्र कार्या विचारणा इति ॥ तेन नवम्या
मुपक्रम्य नवम्यामेव समापयेत् ॥ गौडनिबन्धेष्वप्येके त्विदमेवारभ्य नवम्यां समापयन्ति ॥ त
त्र मूलं शिष्टाचार एव । अत्र डामरतन्त्रे विशेषः पायसं सर्पिषा युक्तं तिलैः शुक्लैः विमिश्रि
तम् ॥ होमयेद्विधिवद्भक्त्या दशांशेन जपोत्तमम् ॥ रुद्राध्यायेन वा होमं मन्त्रेणानेन साधयेत्
। रुद्रयामलेऽपि । प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा ॥ किंशुकैः सर्षपैः एगैर्लाज
दूर्वाङ्कुरैरपि ॥ यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैरपि ॥ रक्तचन्दनखण्डैश्च गुग्गुलैश्च सुम
नोहरैः ॥ प्रतिश्लोकं च जुहुयात् सर्वद्रव्याणि च क्रमादिति । यत्तु केचित्त्वष्टम्यां नागरं कु
र्यान्नवम्योपारणं तथा ॥ दशम्यां च विसर्गः स्यादभिषेकस्तथा भवेदिति ड्यामला

स॰मा॰
५३

तगानवम्यांचविशाखायांहकार्याहोमादिकाक्रिया॥ पारणंचप्रकुर्वीतदेवीपूज
नपूर्वकं॥ दशम्यामिमिश्रितायत्रपारणोनवमीभवेत्॥ सप्तजन्मकृतंपुण्यंतत्क्ष
णादेवनश्यति। तथा॥ योमोहात्पारणांकुर्याद्दशमीदिवसेविभो॥ तदाष्टंनाशमाया
तिदुर्भिक्षादिभयंभवेत्॥ नपहानंभवेद्राष्ट्रंदशम्यांपारणेकृते॥ तस्मात्तुपारणेदेवनव
म्यांभक्तितत्परः नवम्यांपारितादेवीकुलवृद्धिंप्रयच्छति। दशम्यांपारितादेवीकुलनाशं
करोतिवै॥ तस्मात्तुपारणांकुर्यान्नवम्यांविबुधाधिपेतिदेवीपुराणादेश्चनवम्यामेवरुः। त
त्र॥ एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेननक्तेनस्वशक्त्यायाचितेनवा॥ रा॰म॰
अपवानवनक्तैश्चनवरात्रंसमापयेदितिभविष्यादिवचोभिरुपवासादिषुशक्त्यावि ५३
हितस्यनवतिथ्यधिकरणकत्वस्यबाधापत्तेः। अस्मिन्वाक्यएकभक्तादिशब्दसममभिव्या

53

हारेणानवरात्रं समापयेदिति नामधेयान्तरसत्ताच्च नवतिथिरूपगुणविधिरेव युक्तो नवरा
त्रोपवासतइति न नामधेयं नवमीपारणविधायका दशमी निषेधकानि च पूर्वोक्तानि
वचांसि तु महानिबंधादिग्रन्थदर्शनात्प्रायो निर्मूलान्यपि समूलत्वेपि तेषां एवं घुरष्टमीविद्धत्वे
न नवमीप्रयुक्त उपवासे जाते परेद्युः स्वावशिष्टकिंचिन्नवमीसत्त्वे नवम्यंतः पारणविधा
यकत्वं॥ न तु प्रागमोपवासबाधकत्वं। एवं च सर्वेषामुपवासानामंतरेव हि पारणमिति च
चोवगतावशिष्टनवम्यंतः पारणस्यापोद्यतिथ्यं पारणविधिना बाधितस्य प्रतिप्रसववि
धित्वे नैषा लाघवं॥ अन्यथा प्रागमविहितपारणे खं॥ अन्त्यदशम्यां पारणं न कार्यमित्ये
तेषामनुवादकत्वमेव न विधायकत्वं॥ अत्रैके शौधपत्रे विस्तरस्त्वात्रतातचरणकृते द्वैत
निर्णये बोध्यः॥ पारणं तु सूतकेपि कार्यं॥ तदुक्तं रुद्रयामले॥ सूतके पारणं कुर्यान्नवम्यां

होमेमं मपूर्वकमिति ॥ एवं स्त्रीभिरपि रजोदर्शनमध्ये कार्यं ॥ तदाह सम्बवर्तः ॥ यास्व द
र्घेतपसां नारीणां यद्रजो भवेत् ॥ न तत्रापि व्रतं तस्य स्यादुपरोधः कदाचनेति ॥ एतव्वसध
वासंज्ञेयं ॥ विधवायास्तु त्रिरात्रमध्ये भोजननिषेधो ह्रिरात्रमध्ये भोजने निषेधः एवं
स्वपुष्यायमानउतिदिक्रूम ॥ ॥ इति नवमीनिर्णयः ॥ दितिकेचिन्नत्र । [redacted]
[redacted] निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधयारणाविर्षयत्वायोगात् ॥ वस्तुतस्त्वर
जस्वलाया विधवाया ॥ २ यः ॥ अथ दशमी ॥ सा द्वेधा पूर्वा शुक्ले तु नरा ॥ सम्पूर्णो द्द्श
मीकार्या परया पूर्वया थवा ॥ युक्ता न दूषिता यस्मादिति सा सर्वतोमुखीति अंगिराः स्म
तेः ॥ अपेचतिक सोपवस्थितः शुक्लपक्षेति थियोद्याय स्याम स्युरितो रविः कृष्णपक्षे
ति थियोद्याय स्याम स्तमिनोरविरिति वचोत्तरात् ॥ माधवमतेथेवं । यत्तु हेमाद्रि दिन

द्वयेकर्मकालव्यास्यभावे ऐविछिकोविकल्पइत्या रतनाशास्त्रतोव्यवस्थासेम
वेछिकतायोगात्) उपवासेतुसर्वापिसर्वमतेपर्वैव॥ नागविद्धातुपाषंडः॥ शिव
विद्धाचसप्तमी॥ दशम्येकादशीविद्धानोपोष्यासाकथंचनेति शिवरहस्योक्तेः॥ य
त्तुपद्मपुराणेस्कांदे। दशमीवैधकर्तव्यासगोद्विजसत्तमेति तन्दपुपवासप
र॥ ज्येष्ठशुक्लदशमीदशहरा॥ ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुता॥ हरते
दशपापानितस्माद्दशहरास्मृता॥ तस्यांस्नानंप्रकुर्वीत दानंचैवविशेषतः इ
तिहेमाद्रौब्राह्मोक्तेः दशपापानिचाहमनुः पारुष्यमनृतंचैवपैशुन्यंचापिस
र्वशः। असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं॥ अदत्तानामुपादानंहिंसाचैवा
विधानतः। परदारोपसेवाचकायिकंत्रिविधंस्मृतं। परद्रव्येष्वभिध्यानंम

स.मा. ५५

नसा निरुचिंतनं। चितयामि निवेशाश्वत्रिविधं कर्ममानसां मिति॥ स्कांदे पि। ज्येष्ठे
मासि सिते पक्षे दशम्यां बुधहस्तयोः॥ व्यतीपाते गरानंदे कन्या चेद्वृषे रवौ॥ द
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्येत इति। इयं च योगविशेषवशात्सर्वपा
पहरा ह्या। काशीखंडे। दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः। लिंगं दशा
श्वमेधेशं दृष्ट्वा दशहरा तिथौ। दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः।
स्कांदे। यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं॥ मुच्यते दशभिः पापैः सम
हापातकोपमैः। यद्यत्र ज्येष्ठो मलमासो भवति तदा मलमास एव कार्यं॥ दश राम. ५५
भिः पापैः समहापातकोपमैः हरासु नोत्कर्षस्तत्र विघ्नगारिषु॥ उपाकर्म
मलाषध्योर्वृतं उक्तं वृषादितः इति हेमाद्रौ कृष्णगर्गोक्तेः आश्विन शुक्लदश

55

मीविजयदशमीत्युच्यते। साश्रमीरज्ञायात्मा हैनक्षत्रोदयव्यापिनी ग्राह्या॥ तदु

क्तं रत्नकोशे॥ ईषत्सन्ध्यामतिक्रान्तः किंचिदुद्भिन्नतारकः। विजयो नाम कालोऽयं सर्व

कार्यार्थसाधक इति॥ चिन्तामणावपि॥ आश्विनस्य सिते पक्षे दशम्यां तारकोद

ये॥ स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धये। दिनद्वये नद्या मी एवैं द॥ पापू

र्णा नवमी युक्ता तस्यां पूज्यापराजिता॥ क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः।

नवमीशेषयुक्तायां दशम्यामपराजिता॥ ददाति विजयं देवी पूजिता जयवर्द्धिनी।

एकादश्यां न कुर्वीत पूजनं चापराजितमिति स्कान्दे॥ तत्रैव दशमीं समुल्लं

घ्य प्रस्थानं कुरुते नरः। तस्य संवत्सरं राज्ये न क्वापि विजयो भवेदिति॥ दिनद्वये तार

कोदयकालाभावे परदिने एकादशमुहूर्तै यात्रा कार्या। आश्विनस्य सिते पक्षे द

समा॰ ५६ शम्यांसर्वराशिषु ॥ सापंकालेषु भायात्राद्विवा विजयलग्नतो ॥ एकादशो मु
हूर्त्तोपि विजया परिकीर्त्तितः तस्मिन्सर्वैर्विधानम्या यात्रा विजयकांक्षिभिरिति
रत्नमाले: परदिन एकादशमुहूर्त्तव्याप्त्यभावेपि श्रवणायोगश्चेत्तत्र दपदशमी
56 किंचित्संपूर्णैकादशी यदि श्रवणान्वितयस्यकाले सा तिथिर्विजयाभिधेति मदन
रत्नेदत्तोक्तेः श्रवणार्हेतु पूर्णायां काकुत्स्थः प्रस्थितो यतः उल्लंघयेयुः सीमानं
तद्दिनर्ह्से ततोनरा इति भविष्योक्तेश्च अत्रकृत्यंभविष्ये ॥ शमींसलक्ष्मणोपेतांई
शानाशाप्रतिष्ठितां ॥ संपार्थ्य तांचसंपूज्य वीशानोसुमुखो भवेत् ॥ शमीशमय राम॰
तेपापंशमी लोहितकंटका ॥ धारिण्यर्जुनबाणानां रामसंवारदायिनी ॥ करिष्यमा ५६
णयात्रायां यथाकालंसुखंमम ॥ तत्र निर्विघ्नकर्त्रीत्वंभव श्रीरामपूजिते गृहीत्वा

सात्वतामार्ईशमीमस्लगातोमस्टश।गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति॥ततो
मूषणवस्त्रादि धारयेत्स्वजनैः सहेति दिक्॥ ॥इति दशमीनिर्णयः॥ ॥अथैकाद
शी॥ ॥तत्रोपवासोनित्यः काम्यश्च॥तत्राघमाहसनत्कुमारः॥नकरोति हियोन
र एकादश्यामुपोषणं॥सनरोनरकंयाति रौरवं तमसावृतमिति।गारुडे।उपोष्यैका
दश्यां नित्यं पक्षयोरुभयोरपीति॥काम्यस्तु कौर्मे।यदीच्छेद्विष्णुसायुज्यं श्रियं संततिं
मात्मनः एकादश्यां [redacted] नभुंजीत पक्षयोरुभयोरपीति।स्कांदेपि।यदीच्छेद्विपुला
न्भोगानभक्तिं चात्यंतदुर्लभां॥एकादश्यामुपवसेत्पक्षयोरुभयोरपीति।अथाधिकारी
कात्यायनः।अष्टवर्षाधिकोमर्त्योह्यशीतिर्न्नवत्सरः एकादश्यामुपवसेत्पक्षयोरुभयो
रपीति।विष्णु अष्टवर्षाधिकऊर्ध्वमपनयनोनरस्त्यापलक्षणं।अपिवावेदहत्यातोऽपापेन

स०मा० ५२ प्रवर्त्तेरन्निति षेष्ठुक्तापितत्वात्॥ एतच्च गृहस्थव्यतिरिक्तपरं मदुक्तं कौर्मे। एकादश्यां न भुं
जीत पक्षयोरुभयोरपि वनस्थयतिधर्मोयं शुक्लामेव सदा गृही॥ एकादश्यां न भुंजीत पक्ष
योरुभयोरपि॥ ब्रह्मचारी च नारी च शुक्लामेव सदा गृही॥ नारी विधवा। ब्रह्मचारि साहच
र्यात्। सधवायास्तु पक्षद्वयेपि निषेधः। पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्॥ आयु
ष्यं हरते भर्तुः सा नारी नरकं व्रजेदिति विष्णूक्तेः नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोष
णं। पतिं शुश्रूषते या तु तेन स्वर्गे महीयत इति मनूक्तेश्च तथा। यद्देवेभ्यो यच्च पित्राद्या
द्विकेभ्यः कुर्याद्भर्त्राभ्यर्चनं सत्क्रियां च। स्यार्द्धं सा फलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूष राम० ५२
यैवेति। भर्त्राज्ञया तु सधवाया अप्यधिकारोस्त्येव। भार्या पत्युर्मतेनैव व्रतादीनाचरेत्स
देति कात्यायनोक्तेः चातुर्मास्यांतर्गतास्तु कस्यापि ग[illegible]णोपोष्या॥ शयनीबोधिनीमध्यगा

57

कृष्णैकादशी भवेत्॥ सैवोपोष्या गृहस्थेन नान्या [?]स्माकदाचनेति पाद्मात्। एतच्चापुत्र
गृहिविषयं। पुत्रवतस्तत्रापि निषेधः संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे। चंद्रसूर्यग्रहे चै
व न कुर्यात्पुत्रवान्गृहीति नारदोक्तेः। आदित्येहनि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः पारणं चोप
वासं च न कुर्यात्पुत्रवान्गृहीति तद्युक्तोपवासस्य निषेधोपमुक्तो ह्नतः प्रयुक्त्यंतरपुत्रस्य
न विधिर्न निषेध इति जैमिनिस्मृतेश्च॥ स्मृत्यंतरेपि। विधवाया वनस्थस्य यतेश्चैका
दशीद्वये। उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः इति। हेमाद्रिस्त्वेवं। काम्यायां कृ
ष्णोपवासमाह नारदः। पुत्रवांश्च सभार्यश्च बंधुयुक्तस्तथैव च। उभयोः पक्षयोः काम्यव्र
तं कुर्याद्वैष्णवमिति॥ वैष्णवैस्तु कृष्णाप्युपोष्येत्याह स एवानित्यं भक्तिसमापन्नैर्नरैर्वि
ष्णुपरायणैः पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणं॥ सपुत्रश्च सभार्यश्च स्वजनो भक्ति

स॰मा॰ संपृक्तः एकादश्यामुपवसेत्तत्तपोरूपमपोरपीति। तत्रैकादशी द्वेधा शुद्धा दशमीविद्धा च॥
५८ आघाणारुजे। उदयात्प्राग्यदा विप्रमुहूर्त्तद्वयसंयुता॥ संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद्गृ
हीति। एकादशी वैष्णवः स्मार्त्तविषयेतु तत्रैव। आदित्योदयवेलायामारभ्य षष्टिनाडिकाः संपू
58 र्णैकादशी नाम कार्या धर्मफलेप्सुभिरिति। दशमीविद्धापि द्वेधा। अरुणोदये सूर्योदये
च दशमीसत्वेन। तत्राद्या भविष्यपुराणे॥ अरुणोदयकाले तु दशमी यदि दृश्यते॥ सा
विद्धैकादशी तत्र पापमूलमुपोषणात्। तथा। अरुणोदयवेलायां दिशागंधो भवेद्यदि
दुष्टं तत्प्रयत्नेन वर्जनीयं नराधिप। दिशा दशमी। दशमीशेषसंयुक्तो यदि स्यादरु राम॰
णोदयः नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमित्यादिभिर्वाक्यैररुणोदये दशमीस ५८
त्वे एकादशी विद्धा। यद्यपि सौरधर्मेषु आदित्योदयवेलामुहूर्त्तद्वयस्यारुणोदययाः

मारणात्तात। अत एव हेमाद्रौ स्मृतिः निशि प्रांते तु यामार्द्धं देववादित्रवादने॥ सारस्वता
नध्ययने चारुणोदय उच्यते इति। यामार्द्धमपि मुहूर्त्तद्वयमेवायतदंड्यात्मकत्वात्तस्य तु ना
डिका अरुणोदय इति तदपि त्रिंशद्घटिकारात्रिमानयत्ते मुहूर्त्तद्वयस्य तावत्परिमाण
त्वाद्युक्तमिति तातचरणाः॥ यदपि ब्रह्मवैवर्त्तयो॥ चतस्रो घटिकाः प्रातररुणोदयनि
श्चयः चतुष्टयविभागोऽत्र वेधादीनां किलोदितः। अरुणोदयवेधः स्यात्सार्द्धं तु घटिका
त्रयं॥ अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः महावेधोपि तत्रैव दृश्यते र्कोन दृश्य
ते॥ तुरीयस्तत्र विहितो योगः सूर्योदये सति। अरुणोदयवेधातिवेधमहावेधयोगसंज्ञा
करणमवांकदोषातिशयार्थं सार्द्धं तु घटिकात्रयं चतस्रो घटिका इति च द्विमुहूर्त
रूपानुगतव्यवहारार्थं तावत्परिमाणस्यापि मुहूर्त्तद्वयस्य रात्रिमानवशेन कदाचि

स॰मा त्सं भवन्मुहूर्त्तं द्वयारुणोदय परमेव । यत्तु ब्रह्मवैवर्त्ते ॥ अर्द्धरात्रे तु केषांचिद्दशम्यां वेध उ
५८ च्यते । कपालवेध इत्याहुराचार्या ये हरिप्रिया इति तन्नैमुतिकरी तां अरुणोदयवेधनिर्णार्थ
मिति माधवः तत्वं तु एवं वत्सरपीमेषु प्रतसंकल्पपूजार्जुनार्थमितमनुपदमेव वक्ष्यते । यद
पि नागोक्त दशनाडीभिरि । केचिद्दशभिस्तथा । भृतोक्त दशनाडीभिर्दूषयत्फलरांति तिथि
मिति स्कांदं तद्व्यवस्थोत्तरो निगमे ॥ सर्वप्रकारवेधोयमुपवासस्य दूषकः सार्द्धसप्तमुहू
र्त्तैस्तु योगो विबाधते व्रतमिति । व्रतमुपवासमित्र मिति माधवः तत्रारुणोदयवेधो वैष्णव
परः तद्वक्तो वैष्णवग्रहणात् । परिशेषात्सूर्योदयवेधो वैष्णवभिन्नपरः ॥ त एवस्मान्नैप राम॰
दे नवत्र द्विधीते धियेषु ॥ वैष्णवलक्षणं तु गारुडे । वैष्णवो न सा भागमोक्तदीक्षां प्राप्तो हि वैष्ण ५८
वः माधवीये स्कांदेपि । परामापदमापन्नो हर्षे वा समुपस्थितो । नैकादशीं त्यजेत्सापि

५९

यस्मरोत्तास्तिवैस्नवी। अमत्व। विद पिंताखिलाचारः सहिवैस्नवउच्यते॥ भतिष्येपि
यथाशुक्लातथाकृष्णायथाकुस्नातथोत्तरा॥ उभेतेमन्यतेपस्तुसहिवैस्नवउच्यते॥ तत्र
शुद्धैकादशीचतुर्धा। अधिकैकादशिका॥ अधिकद्वादशिका॥ उभयाधिका॥ अ
नुभयाधिकाचेति॥ एवंविद्धापि॥ शुद्धायामेकादश्यांधिकेयल्हधमः संपूर्णैकादशी
यत्रप्रभातेपुनरेवसा। लप्यतेद्वादशीतत्रउपवासःकथंभवेत॥ उपोष्येदितिथौतत्र
विष्णुप्रीणानतत्परैरिति। विष्णुप्रीणानतत्परावैस्नवाः तदितरस्मार्ताप्रतिनुसांदे॥ प्र
थमेहनिसंपूर्णाव्याप्याहोरात्रसंयुता॥ द्वादश्यांतुतथोनातद्दश्यतेपुनरेवसास्वी
कार्याविरहस्तैश्चपतिभिश्चातुरादिभोइति। एतद्यपरेद्युर्द्वादश्यभावपरं॥ गारुडेपा॥
पुनःप्रभातसमयेघटिकैकापराभवेत॥ तत्रोपवासोविहितोवनस्थस्यपतेस्तथा॥

स·मा० ६०

60

विधवाया अतश्चैव परतो द्वादशी न चेदिति। शुद्धायां द्वादशी मात्राधिक्ये तु नारदः। न चेदेकाद
शी विस्पृष्टा द्वादशी परतः स्थिता॥ उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति। विद्धैका
दश्या। उभयाधिक्ये तु सुदशी यदीति गतरणुभपरस्तोजयेत्॥ अनुभयाधिक्ये तु संदेह ए
व॥ विद्धैकादश्याधिक्ये तु अचेताः एकादशी विद्धा चेत्स्युः लोके क सर्वे विशेषतः उत्तरां तु
यतिः कुर्यात्सर्वामुपवसेद्द्वादशीमिति॥ शुद्धायां द्वादशी मात्राधिक्ये तु परे द्युरुपवासः तदाह व्या
सः एकादशी यदा लुप्ता परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमि
ति माधवः तत्र। लोपपदस्य सूर्योदयासंस्पर्शोऽर्थः। वृमे प्रसिद्ध्या सूर्योदयगतदशमीवि
द्धायामेतद्वचनप्रवृत्तेः। अतो नेदं शुद्धन्यूनाधिकद्वादशिकायामुत्तरदिन उपवास विधा
यकं। यदपि कैश्चिदलुप्तेति छित्वा दमत सरलपायोजितं॥ तच्चिन्त्यं॥ अकारप्रश्लेषे मानाभा

रा·म० ६०

वात। दिनत्तयेतु पुत्रवद्गृहस्थेनोपवासो न कार्यः तथाह पितामहः एकादश्यां दिनक्षये उ
पवासं करोति यः तस्य पुत्रा विनश्यंति मघायां पिंडदो यथेति। दिनक्षयस्तु पाद्मे। वोति थ्यंता
वेकवारे यस्मिन्स्यात् स दिनक्षय इति। दिनक्षये च य उपवासस्य निषेधः स निराहारस्य वा तेर
थाच वा पवा। यो उपवासं निषेधेत मस्सांकिंचित्कल्पयेत्॥ नदुष्यत्युपवासेन उपवासफल
लभेत्॥ एवं कृष्णैकादश्यामपि गृहस्थस्य। तत्रैवानन्तरं हविष्यान्नमनोदनं वा फलं तिला
ः क्षीरमथांबु वाज्यं। यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति॥ व्रते विशेषः स्म
त्यंतरे॥ दशम्यादिमहीपालत्रिदिनं परिवर्जयेत्। गंधताम्बूलपुष्पादि स्त्रीसंभोगमहापथाः।
स्त्रीसंभोगनिषेधस्तु कर्तृकालादन्यत्रेति श्राद्धिकातेगक्रे॥ स्कान्दे॥ कांस्यं मांसं मसूरं च
क्षौद्रं चानृतभाषणं॥ पुनर्भोजनमप्यासं दशम्यां परिवर्जयेत्॥ कौर्मे॥ कांस्यं मांसं मसूर

स॰मा॰ रंचगणकानकोरदूषकान॥ शाकं मधुपरान्नं चतान्नेउपवसन्स्त्रियी॥ आत्मनो कांस्यं मा॰
६१ संसुरां त्तैोडतैलं वितथभाषणं। आपामं च प्रवासं च दिवास्वापं च मैथुनं। तिल ष्टंम
सूरं च दशम्यां रिषु वर्जयेत्॥ दशम्यां प्रकृतः नारदीये। अन्नाराल वर्गाः सर्वे हविष्या॰
न्न निषेविणः। अवनीतलशयनाः प्रियासंगविवर्जिताः॥ अन्यत्रापि। दशम्यामे
कभक्तं तु कुर्वीत नियतेंद्रियः। आचम्य दंतकाष्ठं तु खादेत तदनंतरं। ततश्चानंतरं वि
प्रब्रह्मचारी जितेंद्रियः। रात्रिं नयेत्ततः पश्चात्प्रातः स्नात्वा समाहितः। उपवासं संकल्प्य
मंत्रमेतज्जलं पिबेत्। दशम्यामेकभक्तोकामेकादशीपरं॥ सापमाघ्रांतयोरद्भौः मा॰ राम॰
यं प्रातस्त्वम यमे। उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयं। अ॰ यतिमोवासोबत्सायंप्रा ६१
तर्भुजिक्रियां॥ वर्जयेन्मतिमान्विप्रः संग्रामे हरिवासरे इति विष्णुलोके। दशम्यामेक

61

मद्यस्तु मांसमैथुनवर्ज्जितः एकादशीमुपवसेत्पक्षयोरुभयोरपि देवतास्तस्य तुष्यं
ति कामितं चास्य सिध्यतीति॥ देवलोक्तेश्च। अस्मिन्दिने च यन्नियमा नित्यव्रते नावश्यकाः॥ त
था च ब्रह्मवैवर्त्ते॥ इति विज्ञाय कुर्वीतावश्यमेकादशीव्रतं। विशेषनियमाशक्तोहोरात्र
भुक्तिवर्ज्जित इति। कात्यायनोपि॥ शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणमिति। ब्र
ह्मवैवर्त्ते। प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि। दशम्यामुपवासस्य प्रकुर्याद्वै सवं अं
॥ देवलः। गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यथा संकल्पयेद्बु
धः। औदुम्बरं ताम्रमयं॥ यथासंकल्पयद्यथाकामं फलमुद्दिश्येति स्मर्थः। वाराहे। इत्युच्चा
पततो विद्वान्पुष्पांजलिमथार्पयेत्॥ इत्युच्चार्य संकल्प्यमित्यर्थः। कात्यायनः॥ अष्टाक्ष
रेण मन्त्रेण त्रिर्जप्तेनाभिमन्त्रितं उपवासी फलप्रेप्सुः पिबेत्पात्रगतं जलं॥ एवं चैकपाल

स·मा·
६२
62

वैशेषेह विशेषो नारदीये। दशम्याः संगतो येषां एकादश्यां तु रात्रावन्तरे तु। वर्ज्जयेत् [redacted]
चतुरो यामान् संकल्पार्चनयोस्तथा॥ विद्धोपवासे न स्यात्तु दिने तस्मिन्का समा
हितः रात्रौ संपूजयेद्विष्णुं संकल्पं च ततश्चरेत्। एवं प्रकारस्य भासो॥ एकादश्यामुभे प
क्षे निराहारः समाहितः। नानापुष्पैर्मुनिश्रेष्ठ विचित्रं मण्डपं शुभं॥ कृत्वेति शेषः। स्नात्वा स
म्यग्विधानेन सोपवासो जितेन्द्रियः संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः पुष्पैर्गन्धैस्त
था धूपैर्दीपैर्नैवेद्यकैः परैः उपचारैर्बहुविधैर्जपहोमैः प्रदक्षिणैः स्तोत्रैर्नानाविधैर्दि
व्यैर्गीतवाद्यमनोहरैः दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः एवं संपूज्य विधिवद्रात्रौ राम०
कृत्वा प्रजागरं॥ याति विष्णोः परं स्थानं नरो नास्त्यत्र संशय इति। विशेषोऽह हन्नारदीये। पंचा ६२
मृतेन संस्नाप्य एकादश्यां जनार्दनं॥ द्वादश्यां पयसा स्नाप्य हरिसारूप्यमश्नुत इति॥

६२

सूतकादौतु वाराहे ॥ सूतके च रैनेः स्नात्वा प्रणम्य मनसा हरिं । एकादश्यां न भुंजीत व्र
तमेवं न लुप्यते । मृतके पि न भुंजीत एकादश्यां सदा नर इति । स्त्रीणां रजो दर्शने त्वाह मा
धवीये कश्यपर्गः संप्रश्ने पि रजस्विनतास्य द्वादशीव्रतमिति । एकादश्यां श्राद्धप्राप्तौ
त्वाह माधवीये स एव ॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं यदा । उपवासं तदा कुर्या
दाघ्राय [illegible] पितृसेवितमिति । उपवासासामर्थ्ये त्वाह माधवीये मार्कंडेयः एकभक्ते
न नक्तेन तथैवायाचितेन च । उपवासेन दानेन न निर्द्वादशिको भवेत् ॥ हेमाद्रौ पुराणे
उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् । तावद्धनानि वा दद्यात् यद्भुक्ताद्विगुणं तथा । स
